M2449

श्रीगणेशायनमः ॥ पितुःस्कंधेस्थित्वावमलमुकुरालोकंनीय [illegible] शिरः [illegible]
सा विधुंहित्वावह्निंसरसमणिबुद्ध्यागिरिसुताशरभभीलोनीनादिशतुबहुवःशंभुतनयः । [illegible]
भवमरणजरापारवीरास्तुसारराराज द्वैपादिनारीविहरणविलसत्तीरनीरातुषारा दैत्याराध्यांघ्रिचारा हा [illegible]
रूशिरोदेहभारातिधीरारूपेणाक्रांतसारानिजजनवृजिनौघौघहाराविहारा २ अंबांनिजमुखाक्रांतचंद्र
बिंबांनमाम्यहम् केदारंवैरिसंदारंमुक्ताहारंचस्कंदरम् ३ येनाकारिदशास्योदशमुखहीनोपिबाणसं
[illegible] वनजायाचौर्यकरोसोवोऽवतुजानकीकांतः ४ हरिंरामंगुरुंनत्वाभास्करप्रीतयेमया पीयूषहल
री व्याख्याक्रियतेहृद्ययथामति ५ अत्रैवंश्रूयते कविर्जगन्नाथोदिल्लीवल्लभाश्रितस्तद्यवनीसंसर्गदोष
भाक्सन् गंगायाःसकाशात् द्विपंचाशत्सोपानांतरितनिजगृहेस्थितःसन् तत्रैवजान्हव्यागमनस्पर्शने
नात्मशुद्धिंकामयमानःसन् काव्यंयशसेऽर्थकृतेव्यवहारविदेशिवेतररक्षतये सद्यः परनिर्वृतयेकां-
तासंमिततयोपदेशयुजइतिकाव्यप्रकाशोक्तेः शिवेतररक्षातिफलकगंगास्तुतिरूपंकाव्यंचिकीर्षुर्विघ्नवि-
घाताय वस्तुनिर्देशात्मकंमंगलमाचरन् स्वाभिमतंप्रार्थयते समृद्धमिति भोगंगे ते तव युष्मदः ष
ष्ठ्येकवचनविशिष्टस्य तेमयावेकवचनस्य [illegible] आदेशः युष्मदियश्चसंबोध्यः युष्मदःसंबोध्यः
स्वतंत्रः कर्ताअस्मदोवाच्यः इत्यभियुक्तो [illegible] न्यत्रविस्तारः तत्सलिलम् सलति भक्तजनपापा
दिनाशायगच्छतीति सलिलंजलम् षलग [illegible] कलित्फणादिसूत्रेणलच् सलिलंकमलंजलमि
त्यमरः एवंचाशिवशमनप्रार्थनंयुक्तमितिभ [illegible] अस्माकमशिवमकल्याणम् शमयतु नाशयतु
प्रार्थनायांलोट् [illegible] वस [illegible] : सकलाचासौवसुधाचसोर्वीतस्याःवसुधो [illegible]

धरेत्यमरः यद्वाकला ... धत्तेइतिवसुधासकलाचासौवसुधाच तस्याः
पिअनिर्वचनीयमौल्यमथवा समृद्धं बहुसौभाग्यं ... कम् अतिचतुरायाः सधनायाः अपिपृथिव्याः
गंगासलिलंविनानशोभेति लोकेऽपि अ... स्ताटंकनूपुराद्यलंकारसहितायाः अपिप्रमदायाः
कुंकुमकृष्णमणिभिर्विनानशोभाभवनी... सिद्धम् पुनस्तत्किम् यत् लीलाजनितजगतः
लीलयाविलासेन नतुश्रमेणजनितानि ... तानिजगंति चतुर्दशभुवनानियेनसः तस्य खंडपर
शोः खंडयतिरिपून् हिनस्तीतिखंडः तादृशः परशुः शस्त्रविशेषोयस्यभूतेशस्य भूतेशः खंड
परशुरित्यमरः महैश्वर्यंमहच्चतदैश्वर्यंचमहाविभूतिभूतम् विभूतिर्भूतिरैश्वर्यमित्यमरः सन्महदि

समृद्धंसौभाग्यंसकलवसुधायाःकिमपितन्महैश्वर्यंलीलाजनितजगतःखंडपरशोः

तिसमासेआङ्महदित्यात्वेवृद्धिः गंगासलिलमात्रसहायेनेश्वरेणविलासादेव चतुर्दशभुवनानि कृता
...भावः लोकेपिकश्चनधनेसहायेसति लीलयाब्रह्मपुर्यादिकंनिर्मातीतिप्रसिद्धम् पुनस्तत्किम् यत्
श्रुतीनाम् श्रूयतेधर्मोयाभिस्ताः श्रुतयः चत्वारोवेदाः श्रुभ्रजीत्यादिनाक्तिन् श्रुतिः स्त्रीवेदआ
म्नाय इत्यमरः तेषांसर्वस्वम् सर्वंचतत्स्वंचसर्वस्वम् इदमेववेदानांधनमितिभावः यद्वा सर्वंच
तत्स्वंच आत्मा इदंसलिलमेववेदानामात्मेतिभावः स्वोज्ञातावात्मनिस्वंत्रिष्वात्मीयेस्वोऽस्त्रि...
इत्यमरः पुनस्तत्किम् अथयत्सुमनसांसुपर्वणाम् सुपर्वाणःसुमनसइत्यमरः ...
कृतंपुण्यम् स्याद्धर्ममस्त्रियांपुण्यश्रेयसीसु... वृषइत्यमरः ... त्किम ...

तमिवसौंदर्यं यस्य तत् अतिशयमित्यर्थः मधुरास्वादचिरजीवित्वादितत्कार्यकारीति वा यद्वा सुधासौ दर्यमिति वा पाठः स्वधेति पृथक्पदम् चंद्रोसुरवृमितिवत्सलिलविशेषणम् पुनस्तत्किम् सौदर्यम् सम्य कुदरीहिमाचलकंदरं तत्र भवं सोदरम् भवार्थेऽण् सोदरमेव सौदर्यमिति चातुर्वर्ण्यादित्वात् ष्यञ् आ दौहिमाचले प्रकाशितमिति भावः अथवा स्वधायाः सौंदर्यं भ्रातृरूपं सोदराद्यादित्वः अन्नदरासि तमिति श्लोकपर्यंतं शिखरिणी छंदः तल्लक्षणं तु रसैरुद्रैश्छिन्नायमनसभलागः शिखरिणी वृत्तर त्नाकरोक्तम् शिखरिणी य्मौ म्सौ भ्लौ गृ तु रुद्राइति पिंगलं च बोद्धव्यम् ननु छंदों नरंत्यत्कानेनैव छंद साकिमिति वर्णनमिति चेत् अत्रोच्यते शिखरिणी छंदसि जलदेवताकयगणस्यादौ सत्वेन जलस्पर्शी

श्रुतीनां सर्वस्वं स्वकृतमथ मूर्त्तं स्वमनसां स्वधासौंदर्यं तत्सलिलमशिवं नः शमयतु १

रूपाभिमतफलसिद्धिर्भविष्यतीत्याशयेन अशोकवनिकान्यायेन वेति कृतधियो विदांकुर्वंतु नदु क्तम् मोभूमिः श्रियमातनोति यजलं वृद्धीरवन्हिर्मूर्तिं सोवायुः परदेशदूरगमनं तं व्योमशून्यं फल म् जः सूर्यो रुजमादधाति विपुलां भेंदुर्यशो निर्मलं नो नाकः स्वमीप्सितं फलमिदं प्राहुर्गणानां बुधा इति किमपि तत् इत्येकंपदं वा किमपि अनिर्वचनीयं मोक्षप्राप्तिरूपं फलं तनोति विस्तारयतीति किमपि तत् तनु विस्तारे क्विप् एतत्पक्षे कथंभूतं जलमिति योज्यम् अत्र वाच्यकलुसोपमालंकारः तदुक्तम् उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोरि[illegible] सम्पूर्णं सौभाग्यमिति आदौ रूपकं च एवं च रूप कोपमयोः सं[illegible] लं वर्णयन् स्वाभिमतं प्रार्थयेते दरिद्राणामिति भोगं

इहास्मिन्ल... ...भून्निवार्वारीत्यमरः अयंपुरोवर्त्तीसन्निकृष्टेइदंशब्दः तदुक्तम् इदमस्तुसन्निकृष्टंसमीपवर्त्तिचैतदोरूपम् अदसस्तुविप्रकृष्टंतदितिपरोक्षेविजानीयादि– तिप्रवाहोनिर्झरः प्रवाहोनिर्झरोझरइत्यमरः नः अस्माकं अपारां अनंतांश्रियम् दिशतु ददातु दिश अतिसर्जनइतिधातोः प्रार्थनायांलोट् अतिसर्जनंदानम् किंकुर्वन् सन् दृष्टिसरणिम् नेत्रमार्गम् सरणिः पद्धतिः पद्येत्यमरः सकृदपिएकवारमपिगतः सन् प्राप्तःसन् दरिद्राणांरंकाणांदैन्यंदीनताम् अथानंतरम् दुर्वासनत्वदाम् दुष्टावासनायस्यतद्दुर्वासनंतादृशं त्वत्तत्येषांतेषाम् स्वांतंहृन्मानसंमनइत्यमरः दुरितमपिपापमपि अंहोदुरितदुष्कृतमित्यमरः द्रुतंशीघ्रंदूरीकुर्वन् अभूततद्भावेच्विः कु

दरिद्राणांदैन्यंदुरितमथदुर्वासनत्वदांद्रुतंदूरीकुर्वन्सकृदपिगतोदृष्टिसरणिम्

गतीतिसमासः कथंभूतः प्रवाहः द्रागाविद्याद्रुमदलनदीक्षागुरुः आसमंतादविद्याः मायाः आविद्याः अखिला अविद्या इत्यर्थः मायाबहुत्वेप्रमाणंतु इंद्रोमायाभिरितिश्रुतौ बहुवचनं अतएवतत्वज्ञानादेकस्यमुक्तौ कृत्स्नमुक्तिप्रसंगःस्यात् मायैक्येनतन्निवृत्तौक्वापिसंसाराभावादितिशंकालेशोपिनेतिशंकरभाष्यादिग्रंथेभ्योवधेयमितिदिक् तद्रूपोयोद्रुमः तस्यदलनंछेदनंद्रागाविद्याद्रुमदलनं तस्यदीक्षाउपदेशः तस्याः गुरुःबोधकः अत्रापि दृष्टिसरणिंसकृदपिगतःसन्नितियोजनीयम् सकृत्प्रवाहदर्शनेनाविद्याः गच्छंतीतिभावः द्रागाविद्यद्रुमेतिवापाठः अत्राविद्यायाः इमे आविद्याः तेचते २
द्रुमाश्चशेषंपूर्ववत् २ इदानींतरंगरूपत्वेनजलंवर्णयन्नाशिषःप्रयुंजते उदंचदिति गंगा ततुभुवः

गंगायास्तनुः मूर्तिः स्त्रियांमूर्तिस्तनुस्तनूरित्यमरः तस्याः भवंतितेगंगातनुभुवः भवतेःक्विप्
नभूस्रुधियोरितियण् निषेधादुवङ् मोत्तुंगाः उन्नताः एतादृशास्तरंगाः ऊर्मयः भंगस्तरंगऊर्मिर्वेत्य
मरः भवतांभक्तजनानांदुरितभयभंगाय दुरितंचभयंच तयोर्भंगायनाशायक्रियार्थोपपदेतिचतुर्थी
भवंतु आशिषिलोट् कथंभूतास्तरंगाः उदंचन्मार्त्तंडस्फुटकपटहेरंबजननीकटाक्षव्यापेपक्ष्मणजनि
तसंक्षोभनिवहाः हेशिवेरंबतेशब्दंकरोति इतिसप्तम्याअलुक् हः शंकरेहरौ हंसेरणरोमांचवाजिषुइ
तिनानार्थमंजरी अबिरबिशब्देपचाद्यच् तत्पुरुषेकृतीतिसप्तम्याअलुक् अप्येकदंतहेरंबलंबोदरगजा
ननाइत्यमरः हेरंबस्यजननीमातापार्वती तस्याःकटाक्षाः अपांगदर्शनानि कटाक्षोपांगदर्शनमित्यमरः

अपिद्रागाविद्याद्रुमदलनदीक्षागुरुरिहप्रवाहस्तेवारांश्रियमयमपारांदिशतुनः २ उ
दंचन्मार्तंडस्फुटकपटहेरंबजननीकटाक्षव्याक्षेपक्ष्मणजनितसंक्षोभनिवहाः ' स्फुटंचत

त्कपटंचव्याजंच कपटोस्त्रीव्याजेत्यमरः स्फुटकपटेनहेरंबजननीकटाक्षाः उदंचन्उदयंप्राप्नुवन्योमा
र्तंडः अर्कः विकर्तनार्कमार्तंडइत्यमरः उदंचन्मार्तंडवत् स्फुटकपटहेरंबजननीकटाक्षाः अतिरक्ता
इत्यर्थः तेषांव्याक्षेपः विलंबः चिरकालपर्यंतंकटाक्षस्थितिरित्यर्थः यद्वा व्याक्षेपः संबंधः तेनक्षणं
क्षणपर्यंतंजनितः उत्पादितः तादृशाः संक्षोभनिवहोभयसमूहोयेषांते पुनः कथंभूताः अतएवहर
शिरसिस्वाधारभूते महादेवमस्तके त्वंगंतः कंपंतः इतस्तनोगच्छंतोवा त्वगिकंपनेइत्यस्मात् उरवउ
... र्कत्वम् ... केचित्तु उदंचन्मातसर्येतिपाठः तत्रसापत्न्यभावात्

दाश्रयान् यासर्वेस्फुरास्तृणप्रायीकृताः अधुनायदित्वमेव
र्यकरणेउदासीनानाहंअहंकथंमग्रेरोदनंकरोमीत्याह नवेति भो अंबजननि अंबार्थनद्योरिति ह्रस्वः
नवालंबादाश्रयात् स्फुरदलघुगर्वेण स्फुरन् देदीप्यमानः अलघुर्महान्गर्वोऽहंकारोयस्यतेनमयासर्वे
स्फुरगणाः अवज्ञासरणिं अवज्ञाया अवहेलनस्यसरणिस्तांसहसाअविचारेणनीताः प्रापिताः अत्र
प्रधानकर्मण्याख्येयेलादीनाहुर्द्विकर्मणामितिभाष्योक्तेः स्फुरगणरूपेप्रधानकर्मणिक्तः अतएवाभिहित
त्वात्तत्रप्रथमेतिदिक् भोभागीरथिभगीरथस्येयंभागीरथी तत्संबोधनम् तस्येदमित्यणिटिड्ढाणेतिङी
प् इदानीमुद्धारसमयेयदि औदास्यंउदासीनत्वं उद्धारानुकूलव्यापारशून्यत्वमित्यर्थः भजसिअंगीक

भवंतुत्वंगंतोहरशिरसिगंगाननुभुवस्तरंगाःप्रोत्तुंगादुरितभयभंगायभवताम् ३
नवालंबादंबस्फुरदलघुगर्वेणसहसामयासर्वेवज्ञासरणिमथनीताःसुरगणाः ॥ रोषि त

दानर्हिंनिराधारः निर्गतः आधारोयस्यसः एतादृशोहमिहलोकेकेषांपुरः अग्रेरोदिमिरोदनंकरोमि
हाइतिकष्टेरवेदेवाइनित्वंकथय वद रुदिर अश्रुविमोचने रुदादिभ्यः सार्वधातुकेइतीट् देवानामवहेल
नात्तैः त्यक्तः त्वमपि अस्मिन्समयेयदित्यजसि तर्हिमेकागतिरितित्वमेवकथयेतिभावः। ४ पुनरपिप्र
वाहरूपंस्मरन् पापहरणंप्रार्थयते स्मृतिमितिहे गंगे तव प्रवाहरूपामूर्तिः अकृतस्कृतानां अती
ताद्यतनजन्मस्कृतपातकानांपुरुषाणामपिस्मृतिंस्मरणंयातापाप्तासती चंद्रांशुसरणिः चंद्रस्यांशवः ३
किरणाः तेषांसरणिःपंक्तिः सरणिः पद्धतिरित्यमरः तिमिरं अंधकारं यथा तथांतस्तंद्रां अंतः करणा

ज्ञानालस्यंनाशयति यथा चंद्रोदयेन तमोनश्यति तथातवस्मरणेन महापातकिनां त
त्सदृशानांपातकं नश्यति पुनस्तत्किम् मूर्त्तिः सकलाः सुराः देवाः तैः संसेव्य सलिला
सेवनीय जला एतादृशी तेमूर्त्तिः ममांतः संतापंअंतःकरणस्यंत्रिविधंकायिकवाचिक
मानसिक रूपंपापंच तत्कृतं संतापमाधिभूताध्यात्माधिदैवंवा हरताम् तथाजाते
जन्ममरणकष्टान्मुक्तःस्यामितिभावः ५ इदानींराज्यत्यागपूर्वकंत्वत्तीरवासिनांल
भः पानेनजायमानआनंदः ततोन्यूनस्वर्गमोक्षमुपहसतीत्याह अपीति भोजनानि

अपिप्राज्यंराज्यंतृणमिवपरित्यज्यसहसाविलोलद्वानीरंतवजननितीरं
श्रितवतां सुधातःस्वादीयःसलिलभरमातृप्तिपिबतांजनानामानंदःप
रिहसतिनिर्वाणपदवीं ६ प्राज्यं प्रभूतमपि प्रभूतंप्रचुरंप्राज्यमित्यमरः समु
द्रांतमपीत्यर्थः एतादृशंराज्यं राज्ञःकर्म पुरोहितादित्वाद्यक् प्रजापालनात्मकं सहसातृणमि-
वपरित्यज्य अनेनलोभाभावः सूचितः विलोलद्वानीरं विलोलंतः वायुनाचंचलाः वानीराः
वेतसवृक्षाः यस्मिन्तत् वेतसपर्याये रथाभ्रपुष्पविदुलशीतवानीरवंजुलाइत्यमरः अ
नेनछायानिबिडत्वंसूचितं एतादृशंतवतीरं कूलं रोधश्चतीरंचेत्यमरः श्रितवतां सेवतां सुधातः
अमृतात् पंचम्यंतात्तसिल स्वादीयःसलिलं पे अतिशयेनस्वादुः स्वादीयान् अतिशायनेई

यस्मिन् सचासौसलिलभरश्चतं आतृप्तिपर्यंतंपं[illegible]यपाङ्‌परिभिरितिसमासः पिबतांपानंकुर्वतां
पाधातोःशतरिपाघ्रेतिपिबादेशः एतादृशानां ज[illegible]नामानंदः निर्वाणपदवीं निर्वाणस्यकैवलस्यपद
वींमार्गं मुक्तिः कैवल्यनिर्वाणेत्यमरः परिहसति उपहसति ६ इदानींसाक्षात्स्वयंस्नानमकुर्वं
नामपित्वयि अन्यसंबंधित्वेनस्वावयवपतने तेषामप्युत्तम लोकप्राप्तिःसाक्षात्स्नायिनांकिंव-
क्तव्यमित्याह प्रभातइति भोमातः प्रभाते उषसि प्रत्यूषोहर्मुखंकल्यमुषःप्रत्युषसी अपि प्रभा
तंचेत्यमरः स्नातीनामर्थात्तवजलेस्नानंकुर्वतीनां नृपतिरमणीनां राजसुंदरीणां ब्राह्मणादिस्त्रीणां

प्रभातेस्नातीनांनृपतिरमणीनांकुचतटीगतोयावन्मातर्मिलतितवतोयैर्मृगमदः मृ
गास्तावद्वैमानिकशतसहस्रैःपरिवृताविशंतिस्वच्छंदंविमलवपुषोनंदनवनम् ७

दारिद्र्यबाहुल्यान्मृगमदोनमिलतीतिउक्तंनृपतिरमणीनामिति तासांतुसंपत्तिबाहुल्यात्ससुलभइति-
भावः कुचतटीगतः कुचानांतटयः प्रांताः तासुगतः विद्यमानः तटशब्दाज्जातिलक्षणोङीष् त
टंत्रिषुइतिकोशात् स्त्रियामपितटशब्दः रात्रौरतिसमयेलापितः अतएवस्थितइत्यर्थः एतादृ-
शोमृगमदः कस्तूरी मृगनाभिर्मृगमदः कस्तूरीचेत्यमरः तवतोयैरंभोभिः सहयुक्तेतृतीयाअंभो
र्णस्तोयपानीयमित्यमरः यावद्यास्मिन्नेवकालेमिलति संबद्धोभवति तावत्तस्मिन्नेवकालेमृगाः मृग ४
यंति उदरपोषणायतृणादिकमन्वेषयंति तेमृगाः हरिणाः मृगेकुरंगवातायुहरिणाजिनयोनय इत्यमरः

विमलवपुषः विमलं मलरहितं वपुर्येषां ते एतादृशाः संतो नंदनव
त्युः तच्चतदू नंच इंद्रोद्यानम् नंदनंवनम् अस्योद्यानमित्यम
गच्छंतीत्यर्थः क्वचित्तु विमलमतय इति पाठः कथंभूताः मृ
रंति गच्छंतीति वैमानिकाः देवाः चरंतीति ठक् तेषांशत
विष्ठिताः ७ इदानीं स्मरणोच्चारणाभ्यां क्रमेण मनः शांतिप
समये मन्मुखे स्तु इत्याह स्मृतमिति भोभागीरथि तत् गं
णप्रांतः प्राणानामसूनां पुंसि भूम्न्यसवः प्राणा इत्यमरः
धानमव्ययम् प्राणोत्क्रमणसमय इत्यर्थः वदनकमलां
दित्वात्समासः वदनं कमलमिवेत्युपमितसमासो वा त
न प्राणोत्क्रमणसमये गंगागंगेत्युच्चारणं भवतु
तत् कियत् गंगेतिपदं सकृदपि एकवारमपि
ग्रहक्षमं द्वेषलोभादिरहितं वा विरचयति
शांतस्फुरद्वाग्निश्चेत्सपरः स्वप्रतियहेत्तुरा
चरिनम्पत

षिंमनीयेषांते एतादृशानभवं
देवाह कथंभूतंतीरं निवासार्हं
गपहरणं जनिरुत्पत्तिः जनिरु
ः शोकः पुत्रकलत्रादिवियोग
अमरावत्यां तु क्षीणे पुण्ये मृत्य
वः कदाचित् विमानस्थैर्नेंद्रेण
वानांप्रसरति मनोवागवसरः
व्यमित्युक्ते अत्रैव वयं निवसामः
। ९ ननु सर्वोत्कृष्टं वेदाद्यगोचरंपरं
तिचेत्तादृशं ब्रह्म तत्त्वमेव नेतरां विषय
टिनीधुनी तत्संबोधनम् तटिनी ह्रादिनी धु
त्कारणत्वेन प्रसिद्धम् ब्रह्मत्वम् सर्ववाक्यं साव
षः नविषयः त्वमितरविषयभूता नासीत्यर्थः न
ः भेदो येभ्यस्ते गलितभेदाः तैरद्वैतप्रतिपादकैः ने

ह्नानास्तिकिंचन [illegible] इत्यादिप्रत्यक्षश्रुतिभिरविनअवसितम् इयत्तयानानि-
श्चितमित्यर्थः षोंतकर्मणीतिधातोर्धातिस्यतीतित्वम् उपसर्गवशादुक्तार्थलाभः तदुक्तम् उपस-
र्गेणधात्वर्थोबलादन्यत्रनीयतइति ननु नेहनानास्ति इत्यादिश्रुतिभिः इतराभावबोधनेपिस्वा
भावाबोधनेनकथमद्वैतसिद्धिरितिचेन्नस्वस्मिन्नपि स्वप्रवृत्त्यास्वाभावस्यापिबोधनात् अतए
वससजुषोरुः खरवसानयोर्विसर्जनीयः इत्यादि निर्देशाः संगच्छंतेइतिदिक् वेदानामप्यगो
चरमित्युक्तत्वादितिभावः॥पुनस्त्वं किम् यस्मिन्ब्रह्मणिजीवानांव्यासादिप्राणिनाम् मनोवाग
वसरः मनश्चवाक्चअनयोः समाहारः मनोवाक् द्वंद्वश्चप्राणीत्येकवद्भावः मनोवाचामवसरः

निराकारंनित्यंनिजमहिमनिर्वासिततमोविश्वोद्भूयत्तत्वंस्फुरतदिनितत्वंनविषयः।१०

व्यापारइतियावत् नप्रसरति नप्रसरणशीलोभवतीत्यर्थः यतोवाचोनिवर्तंते अप्राप्यमन
सासहेतिश्रुतेरितिभावः ननु मनोवागित्यत्र द्वंद्वश्चप्राणीतिनियमान्नित्यसमाहारद्वंद्वाच्चुद
षहांतादितिटचाभाव्यम् तथाचोक्तप्रयोगासंगतिरितिचेन्न समासांतविधेरनित्यत्वात् अत्रप्रमाणं
तु अम्बादिगणेराजन्शब्दपाठः इतिदिक् मनःशब्दस्यप्राण्यंगत्वाभावेनशंकैवनेतिवा पुनस्त्वं नि
राकारं निर्गतः आकारोयस्यतत् अशरीरमित्यर्थः अपाणिपादमित्यादिश्रुतेः पुनः नित्यंनिरंतरंभवं
नित्यम् अव्ययात्त्यप् उत्पत्त्यादिशून्यमित्यर्थः नजायतेम्रियते इत्यादिस्मृतेरित्यर्थः पुनः निजमहिमा
निर्वासिततमः निजमहिम्नास्वमाहात्म्येननिर्वासितंनाशितंतमोयेनतत् स्वप्रकाशमित्यर्थः य

स्यभासासर्वमिदंविभाति यदादित्यगतंतेजोजगद्भासयतेखिलं यच्चंद्रमसियच्चाग्नौतत्तेजोवि
द्धिमामकमित्या दिश्रुतिस्मृतिभ्यामित्यर्थः पुनः किंभूतं मायामलरहितं नारायणतीर्थसरस्व
तीभिरपिगंगेवाद्वितीयंब्रह्मेत्युक्तं नेहनानास्ति इतिश्रुतिवचनजातेभगवतिनिरस्तैवाभासि
स्वयमखिलभेदंस्फुरधुनि चिदात्मैकानित्याचितिस्फुरवसदाविष्कृतिरसि त्वदीयंमोक्षार्थेश्रय
तिजनताजीवनपदमिति अत्रशिष्यबुद्धिवैशद्यायकिंचिदुच्यते वेदोनामब्रह्मप्रतिपादकमपौ
रुषेयं प्रमाणवाक्यं सचमंत्रः ब्राह्मणात्मकः तत्रमंत्राणामनुष्ठानकारकभूतद्रव्यदेवताप्रकाशकाः

महादानैर्ध्यानैर्बहुविधवितानैरपिचयन्नलभ्यंघोराभिःसुविमलतपोराशिभि
रपि अचिंत्यंतद्विष्णोःपदमखिलसाधारणतयाददानाकेनासित्वमिहतुलनीयाक
थयनः ११

तेच ऋग्यजुः सामभेदास्त्रिधापादबंधगायत्र्यादिछंदोविशिष्टात्रऋचः अग्नि
मीळइत्यादयः गीतविशिष्टाः ताएवसामानि उभयविलक्षणानियजूंषि ब्राह्मणमपित्रिविधं
विधिरूपंअनुवादरूपं उभयविलक्षणंचेतिमीमांसाग्रंथेभ्योवधेयं इहविस्तारभयान्नतन्य-
तइतिदिक् १० इदानींनिखिललोकानांसाधारण्येनात्यंतदुष्प्रापविष्णुपददात्रीत्वंनकेनापि
तुलनीयेत्याह महादानैरिति भोभागीरथि अखिलसाधारणतया अखिलानां सर्वलोकानां
साधारणतासाधारण्यं नतुन्यूनाधिक्यं तयाविष्णोर्नारायणस्य विष्णुर्नारायणः कृष्ण इत्य
मरः पदंच [illegible] विष्णोः पदंवस्तुविष्णुरूपंवास्त्वित्यर्थः अस्मिन्पक्षेराहोः

शिर इति ... स्यवासतत्राणस्थानलक्ष्मांघ्रिवक्षसीति ददानादात्री न
लोकेतिषष्ठीनिषेधात् पदामितिद्वितीया एतादृशीत्वंइहलोके केनतुलनीयाउपमेयासीतिनिः
अस्मान्कथय वद नादृशस्यकस्याप्यभावान्नकेनाप्युपमेयासीतिभावः यद्वा केनब्रह्मणा
तुलनीयासि अपितुनेत्यर्थः ब्रह्मणोपितादृशसामर्थ्याभावादितिभावः तुलनिष्कर्ष इति
धातोरनीयर् विष्णुरूपंवस्त्विति पक्षेसारूप्यमुक्तिः प्रतीयते तदुक्तंश्रीमच्छंकराचार्यैः त्व
न्मध्यादङ्गुलोछनोगरुडगःपीतांबरोनिर्गतः नारायणंवाशिवंवाइतियेति तत्किम् यद्विष्णुप
दंमहादानैः गजाश्वशिबिकातुलादिरूपैः ध्यानैः चित्तैकाग्रतयाचिंतनैः अपिच बहुविध

नृणामीक्षामात्रादपिपरिहरंत्याभवभयंशिवायास्तेमूर्त्तेःकइहमहिमानंनिगदतु

वितानैरपिचबहुविधाः अनेकप्रकाराः येवितानाः क्रतवः क्रतुविस्तारयोरस्त्रीवितानंत्रिषुतुच्छ
कइत्यमरः यद्वा बहुविधाः येवितानाउल्लोचास्तैः अस्त्रीवितानमुल्लोचेत्यमरः घोराभिः भ
यंकराभिः परमकष्टसाध्याभिर्वास्फविमलतपोराशिभिरपिस्फविमलानिनिर्मलानि नतुमार
णोच्चाटनवशीकरणजनकानि नतादृशानियानितपांसि तेषांराशयः समूहाः तैरपिनल-
भ्यं नप्राप्यं अहोर्धलभधातोः पोरदुपधादितियत् पुनः अचिंत्यं चिंतनानर्हंवागगोचर ७
मितिभावः ११ इदानींदर्शनमात्रेण नृणांसंसारभयंहंत्रींत्वांशिवः पार्वत्यनुरोधत्यागपूर्वकं

निरंतरंशिरसिबिभर्तीत्याह नृणामिति भोभागीरथि ते तवमूर्त्तेः तनोः महिमानंपरमदुर्घटकार्यकर्तृत्व
रूपंमाहात्म्यं इहलोकेकः निगदतुवदतु अपितुनकोपीत्यर्थः माहात्म्यबाहुल्येनकस्यापिवाणीप्रसराभा
वादितिभावः कथंभूतायाः मूर्त्तेः ईक्षामात्रादपि ईक्षैवईक्षामात्रमितिमयूरव्यंसकादित्वात्समासः मा
त्रंकार्त्स्न्येवधारणेइतिकोशादवधारणम् मात्रशब्दार्थः तस्मादपिनृणां नृत्वेनत्वस्यवैकल्पिकत्वाद्दीर्घाभा
वः भवभयंभवात्संसाराद्भयंहरंत्याः तदुक्तम् गंगेत्वद्दर्शनान्मुक्तिर्नजानेस्नानजंफलमिति पुनः कथंभू
तायाः शिवायाः शिवयतीतिशिवातत्करोतीतिण्यंतात्पचाद्यचिटाप् तस्याः यद्वा शिवंकल्याणम् अ
स्तीत्यस्याः सातस्याः यद्वाशिवोमहादेवोभर्तृत्वेनअस्त्यस्याइति शिवोमोक्षोऽस्त्यस्याइति पक्षचतुष्टयेपि

अमर्षम्लानायाःपरममनुरोधंगिरिभुवोविहायःश्रीकंठःशिरसिनियतंधारयतिया

मू १२ अर्श आद्यच् शिवोमोक्षेमहादेवेसुखेक्षेमेजलेशिवमितिशाश्वतः श्रीकंठः कपर्दी उग्रः
कपर्दीश्रीकंठः शितिकंठः कपालभृदित्यमरः अमर्षम्लानायाः अमर्षेण कोपेन कोपक्रोधामर्षरोषप्र
त्यमरः म्लानाग्लानातस्याः एतादृशः गिरिभुवः गिरेर्हिमाचलाद्भवतीतिगिरिभूः पार्वतीक्विप् तस्याः
परमुत्कृष्टम् अनुसरणम् विहायत्यक्त्वा यांगंगां शिरसि नियतम् निरंतरंयथास्यात्तथाधारयति
बिभर्त्ति स्वार्थेणिच् सपत्नीभूतगंगायाः मस्तकधारणेनजातकोपायाः अपिपार्वत्याः सात्वंनादिकंवि
हायअधिकगुणवतींत्वामेवशिरसिबिभर्त्तीतिभा ... लोकेअपि अतिगुणवतोहीरकस्यमस्तक
धारणं ...

पु० ७ ७ ७

संटी॰ इदा॰ वाच्यानियानिपापानितन्नाशिनीत्वमेवेत्याह त्वमिति या

८ नीति भोगंगे उन्मत्तैरविचारकैः। शभः। विशेषेण निंदितुं योग्यानि अपिच पतितैरप्रायश्चित्तादि

भिः परिहार्याणि त्याज्यानि व्रात्यैः गर्भाधानादिसंस्कारहीनैः व्रात्यः संस्कारहीनस्यादित्यमरः अवा

च्यानि वक्तुमयोग्यानि पिशुनैः कर्णेजपैः कर्णेजपः सूचकः स्यात्पिशुनो दुर्जनः खलइत्यमरः सपु

लकं सरोमांचंयथास्यात्तथा अपास्यानि त्याज्यानि एतादृशानि कियतां किंपरिमाणमेषांते कियंतः

तेषां किमः संख्यापरिमाणेडतिचेति वतुप् किमिदंभ्यांवोघः बहूनामित्यर्थः लोकानामेनांसि यांसधे

विनिंद्यान्युन्मत्तैरपिचपरिहार्याणिपतितैरवाच्यानिव्रात्यैःसपुलकमपास्यानिपिशुनैः

हरंतीलोकानामनवरतमेनांसिकियतांकदाप्यश्रांतात्वंजगतिपुनरेकाविजयसे १२

एभिस्त्यानि यंतिगच्छंतिप्रायश्चित्तादिनावा तानिएनांसिकलुषाणि इण आगसीत्यसुन् कलुषंवृजि-

नैनोघमित्यमरः हरंतीनाशयंतीएकासती कदापि कस्मिन्नपिकालेऽश्रांता अखिन्ना एतादृशीत्वं

जगतिविश्वस्मिन् विजयसे सर्वोत्कर्षेण वर्त्तसे लोकेकश्चनकदाचित् एवंकार्यं यदिकरोतितदाश्रां

तोभवति बहुभिर्वाएकंमहत्कार्यंकृतंचेत् सर्वेश्रांताभवंतित्वंतु असाहाया ऽद्वितीया सर्वेषांपा

पानिनिरंतरंहरंत्यपिनश्रांतेतिममापिपापंदूरीकरिष्यस्येवेतिभावः १२ इदानींतवगुणानामेवायं

दोषः यत् पृथ्वीतलेशोकनाशायस्वर्लोकात्पतंत्यास्तव निर्लोभोपिशिवः कपर्दस्थापनमिषेणप्रति ८

ग्रहंचकारेत्याह स्खलंतीति भोभागीरथि अवनितलशोकापत्तनयेअवन्याः पृथिव्याः तलंस्वरूपं

अधःस्वरूपयोरस्त्रीतलमित्यमरः तत्रयः शोकः तस्यापह्नतिर्नाशः तस्यैवअपह्नतिंकर्तुमित्यर्थः
स्वर्लोकात् स्खलंतीपतंतीत्वं पुरभिदाशिवेन जटाजूटग्रंथौ जटाजूटस्यकपर्दस्यग्रंथिः तत्रयत्त्वं
निबद्धा विशेषेणनिरंतरंबद्धासि उपसर्गद्वयंकदापिअन्यत्रगमनाभावंबोधयति अयेजननि नि-
र्लोभानामपि निर्गतः लोभोयेषांतेषामपि मनसिचित्ते लोभंइच्छांजनयतांकुर्वतां तवगुणानामेव
दयादाक्षिण्यादीनामेवायंदोषः परिणतः प्रसृतः निर्लोभतयाकदाप्यप्रतिग्रहकर्त्ताशिवः तवगुण
लोभवशेनैव अपूर्वंप्रतिग्रहंचकारेतिभावः १४ इदानींसर्वेषांरक्षणक्षमंपरमौषधंत्वमसीत्याह ज

स्खलंतीस्वर्लोकादवनितलशोकापहृतयेजटाजूटग्रंथौयदसिविनिबद्धापुरभिदा
अयेनिर्लोभानामपिमनसिलोभंजनयतांगुणानामेवायंतवजननिदोषःपरिणतः १४

जडानंधान्पंगून्प्रकृतिबधिरानुक्तिविकलान्ग्रहग्रस्तानस्ताखिलदुरितनिस्तारसरणीन्

डानिति भोअंब इहकलौजडान् अज्ञान् क्रियासुमंदानित्यर्थः जडोज्ञइत्यमरः अंधान् चक्षुरिंद्रि
यहीनान् पंगून्पादगतिहीनान् प्रकृतिबधिरान् प्रकृत्यास्वभावेनबधिरान् श्रोत्रेंद्रियहीनान् शब्द
श्रवणासमर्थानित्यर्थः उक्तिविकलान् उक्तिभिर्वचनैर्विकलाः हीनाः तान् पूर्वसदृशेतिसमासः
व्याहारउक्तिर्लपितंभाषितंवचनंवचइत्यमरः वचधातोः क्तिनियाचिस्वपीतिसंप्रसारणंग्रहग्रस्तान्
ग्रहे शादित्यादिनवग्रहैर्ग्रस्ताः कवलिताः कृतपीडाइतियावत् तदुक्तंज्योतिः शास्त्रे स्वर्क्षाच्चंद्ररव
लाभ्रिगवारिख[illegible]नश्चापुत्रांश्रयधर्ममृत्युषुकविःस्वास्तत्रिकोणेगुरुः सौ

स्मीर्थे [illegible] ...ग्ध्वंद्गोयोनिजभात्युभंनवल्हतंच्यद्वीपुशेषंनसादिति
अत्ताखिलदुरितनिस्तारसरणीन् आखिलानिचतानिदुरितानिचपापानितेषांनिस्तारणंनाशनं त
स्यसरणिः प्रायश्चित्ताद्याचरणमार्गः अत्ताऽविद्यमाना अखिलदुरितनिस्तार सरणिर्येषांते तान्
पापबाहुल्येनअविद्यमानप्रायश्चित्तादीनित्यर्थः निर्लिपैर्देवैः अनुपसर्गाल्लिंपेतिसूत्रस्थेननोलिंपेः सं
ज्ञायामितिवार्तिकेनशः मुक्तान्स्वहस्तेनपरित्राणाभावात् अपिच निरयांतर्निरयस्य नरकस्य अंतर्म
ध्ये स्यान्नारकस्तुनरकोनिरयोदुर्गतिः स्त्रियामित्यमरः निपततः नितरांपतंतीतिनिपततः तान् ए-
तादृशान् नरान्मनुष्यान् त्रातुं त्वं परमंउत्कृष्टं भेषजंऔषधमसि भेषजौषधभैषज्यानीत्यमरः एवंच

निर्लिपैर्निर्मुक्तानपिचनिरयांतर्निपततोनरानंबत्रातुंत्वमिहपरमंभेषजमसि १५
स्वभावस्वच्छानांसहजशिशिराणामयमपामपारस्तेमातर्जयतिमहिमाकोपिजगति

सर्वभेषजंत्वं सर्वांतर्गतस्यममापिभेषजंभविष्यस्येवेतिभावः १५ इदानींकपिलमुनिनिर्दग्धाः
त्वत्संबंधवशात्स्वर्गेदिव्यदेहधारिणः सगरजाः सगरपुत्राः अद्यापितवमहिमानं अहोधन्याजान्ह
वी निधनंगताअपिवयम् यत्संगवशादीदृशाजाता इत्याकारकंगायंतीत्याह स्वभावेति भोमातः स्व
भावस्वच्छानां स्वभावेननिसर्गेण नतुकृत्रिमेण स्वरूपंचस्वभावश्चनिसर्गश्चाथवेपथुरित्यमरः स्व
च्छानांनिर्मलानां सहजमनायासेनमणिकाद्यसंक्षेपेण शिशिराणांशीतलानां उक्तंचकालिदासेन
शैत्यंहियत्साप्रकृतिर्जलस्येति एतादृशीनांते अपां वारां आपःस्त्रीभूम्निवार्वारित्यमरः अपारः

अमर्याद: अयं कोपिविलक्षणोमहिमामाहात्म्यंजगतिजयति सर्वोत्कर्षेणवर्त्तते सगरजाः सगर
राजपुत्राः अनवद्यद्युतिभृतः संतः नअवद्यागर्ह्या अनवद्यास्तुल्या अवद्यपण्येतिसूत्रेणगर्हायाम्
अवद्येतिनिपातितम् तादृशीचासौद्युतिश्चतांबिभ्रतितिते एतादृशाः संतः अतएवस्फुटपुलकसांद्राः
संतःस्फुटाः प्रकटाः येपुलकाः रोमांचाः तैःसांद्राः निबिडाः संतः महिमानं अद्यापि मुदाप्रीत्या गायं
ति वदंतीत्यर्थः किंकृत्वा द्युतलंदिवस्तलं दिवउदित्युत् द्योदिवौद्वेस्त्रियामित्यमरः समासाद्यअधि
ष्ठित्य सगरेणहि अश्वमेधकरणाय अश्वोविनिर्मुक्तः तत्संरक्षणायस्वपुत्राः नियुक्ताः सअश्वः इं
द्रेणचौर्येणपातालेनीतः सगरपुत्राअपितदानयनायतत्रगताः तेसर्वेकपिलेननिर्दग्धाः पश्चात्

मुदायंगायंतिद्युतलमनवद्यद्युतिभृतःसमासाद्याद्यापिस्फुटपुलकसांद्राःसगरजाः १८
कृतक्षुद्रैनस्कानथझटितिसंतप्तमनसःसमुद्धर्तुंसंतित्रिभुवनतलेतीर्थनिवहाः

भगीरथेनस्वर्गात् गंगामानीयजीविता इतिस्पष्टंरामायणादौ १८ इदानींस्वल्पपापिनांदोषाप
नुत्तये त्रिजगति गोदावर्यादीनिबहूनितीर्थानिसंति अतीतप्रायश्चित्तानांतुदोषहरणेत्वत्तस्तदृशीत्व
मेवसमर्थेत्याह कृतेति भोजनानि कृतक्षुद्रैनस्कान् कृतानिक्षुद्राणिअल्पानि पलांडुभक्षणादीनि
एनांसिपापानियैस्तेतान् शेषाद्विभाषेतिकप् अथ [illegible] रणानंतरं झटितिशीघ्रंसंतप्तमनसः संत
प्तम् पश्चात्तापयुक्तं [illegible] समुद्धर्तुं आचरितपापाद्दूरीकर्तुं त्रिभवन
[illegible] गेहिगुः पात्रादित्वात्

तस्या ... नवहाः समूहाः संतिवं
प्रायश्चित्तप्रसरणपश्चाता ... शनसमर्थधर्मविशेषस्य प्रसरणमाचरणं
तस्य पंथामार्गः वाटः पंथाश्चमार्गश्चेतितिनिकांडम ... ऋक्पूरब्धेतिसमासांतो अप्रत्ययः प्रायश्चि
त्तप्रसरणपश्चात् अतीतं अत्यंतंगतंचरितंयेषांते तानपि बहुकालंबुद्धिपूर्वकंमहत्पापाचरणेन अविद्य
मानप्रायश्चित्तानपीत्यर्थः उक्तंच मुद्गलाचार्यैः सुकृतिनईषत्पापेप्रायश्चित्तंरघूत्तमप्रोक्तं अपचाति-
मात्रमुदीक्ष्यप्रायस्तदपीहगौरिवव्याघ्रमिति एतादृशानपिनरान्दूरीकर्तुम् आचरितपापाद्दुद्धर्तुं त्व
मिव त्वत्सदृशीत्वमेवविजयसे अत्रोपमानोपमेयत्वंगंगायाएव तत्फलंतु अन्यात्वत्सदृशीनास्तीति

अपिप्रायश्चित्तप्रसरणपश्चातीतचरितान्नरान्दूरीकर्तुंत्वमिहजननित्वंविजयसे १७
निधानंधर्माणांकिमपिचविधानंनवमुदांप्रधानंतीर्थानाममलपरिधानंत्रिजगतः

अतएवात्रानन्वयालंकारः तदुक्तं उपमानोपमेयत्वंयदेकस्यैववस्तुनः इंदुरिंदुरिवश्रीमानित्यादौ
तदनन्वयइति प्रायश्चित्तशब्दे प्रायस्यचित्तिचित्तयोरितिपारस्करगणपठितसूत्रेणसुडितिनिष्पन्नः स
चरूढयायोगेनच पापनाशनसमर्थविशेषधर्ममाचष्टे प्रायश्चित्तशब्दश्चायंपापक्षयार्थेनैमित्तिककर्म
विशेषेरूढ इत्याहुः संप्रदायविदोनिबंधकारादयः योगस्त्वांगिरसादर्शितः प्रायोनामतपः प्रोक्तंचित्तं
निश्चयउच्यते तपोनिश्चयसंयुक्तंप्रायश्चित्तंतदुच्यते अस्यार्थः अनुष्ठितेनद्वादशवार्षिकादिना अव- ५०
श्यंपापंनिवर्ततइतिविश्वासोनिश्चयः तेनसंयुक्तं व्रतानुष्ठानलक्षणंतपः प्रायश्चित्तमित्यलंविस्तरेण
१७ इदानीमनेक

गुणविशिष्टत्वेनपापहरणक्षमंतववपुर्ममपापंनाशयत्विइतिमार्थ्यते विधानमिति भोजनानि ध
र्माणांवेदेनप्रयोजनमुद्दिश्य विधीयमानार्थानाम् तदुक्तंजैमिनिना चोदनालक्षणार्थोधर्मास्तेषां
निधानंस्थानं निधीयतेस्थाप्यतेयस्मिन्निति धाधातोः करणाधिकरणयोश्चेतिल्युट् च पुनः नवमु
दां नवाश्चताः मुदश्चतासांनूतनहर्षाणांकिमपिविधानंजनकं गंगादर्शनेनविलक्षणाहर्षाजायंते इ
त्यनुभवसिद्धं कर्तृकर्मणोरितिकर्मणिषष्ठी उभयत्रचपुनः तीर्थानांगोदावर्यादितीर्थानांमध्ये
निर्धारणेषष्ठी यद्वा स्वस्वामिभावसंबंधेषष्ठी तीर्थानांप्रधानंस्वामी तदुक्तम् सतीर्थराजोजयति
प्रयागइति प्रधानम् श्रेष्ठंचपुनः त्रिजगतः त्रयाणांजगतांसमाहारस्त्रिजगत् तस्यतस्थितार्थै

समाधानंबुद्धेरथखलुतिरोधानमधियांश्रियामाधानंनःपरिहरतुतापंतववपुः १८

तिसमाहारेद्विगुः अमलपरिधानए अमलंनिर्मलंचतत्परिधानंचामलपरिधानम् अधोंशुकम् अं
तरीयोपसव्यानपरिधानान्यधोंशुकइत्यमरः यथालोकेकस्यचिद्वसनहीनस्यनशोभा तथाएतद्वि
ना त्रिजगतीत्याकूतम् चपुनः बुद्धेर्मनीषायाः बुद्धिर्मनीषाधिषणाधीः प्रज्ञाशेमुषीमतिरित्यमरः
समाधानंनानादुष्टकल्पनानाशकमित्यर्थः अथानंतरम् अधियांनिर्बुद्धीनांतिरोधानं अपिधानं
तेषामदृश्यंइतिभावः अपिधानतिरोधानपिधानाच्छादनानिचेत्यमरः अथश्रियांलक्ष्मीनां आधा
नंस्थापकं मोक्षादिलक्ष्मीसंपादकमित्यर्थः एतादृशगुणविशिष्टं तववपुः शरीरं गात्रंवपुः संहन
नंशरी ... १८ ७ ७

इदानीं ... अयं ममैवापराध इत्याह पुरइति भोमातः मातृत्वे नापराधः सोढव्य इत्याकूतं एवं ममैव एषनिश्चयार्थः मंतुः अपराधः अस्तीतिशेषः कोसावित्याकांक्षायामाह इहलोके तवविंयोगः स्नानाद्यसंबंधः यत् अभूत् अतः कारणात् क्षणमपिक्षण मात्रमपि करुणादयात्वयामयिकर्त्तव्येतिशेषः कारुण्य करुणाघृणेत्यमरः अपराधभवनेमूलमाह कथंभूतस्यमम द्रविणमदिराघूर्णितदृशां द्रविणमेवमदिरा उन्मादकारित्वात् यद्वाद्रविणंच मदिराच ताभ्यां घूर्णिते घूर्णनयुक्तेभ्रमितइत्यर्थः तादृश्यो दृशोदृष्टीयेषांते दृग्दृष्टीचेत्यमरः

पुरोधावंधावंद्रविणमदिराघूर्णितदृशांमहीपानांनानातरुणतरखेदस्यनियतम् ममैवायंमंतुःस्वहितशतहंतुर्जडधियोवियोगस्तेमातर्यदिहकरुणातःक्षणमपि १९

नानाअनेकेषां अव्ययत्वात् षष्ठ्यालुक् एतादृशानांमहीपानां महीपांतिनेम हीपाः राजानः तेषामग्रेनियतमेव धावंधावं धावित्वाधावित्वा धावुगतिशुद्ध्योरितिधातो राभीक्ष्ण्येणमुल्चेतिणमुलिद्वित्वं तरुणतरखेदस्य अतिशयेनतरुणः तरुणतरः तादृशः खेदः श्रमोयस्यतस्य यद्वा नानातरुणतरखेदस्येत्येकपदं नानाअनेकविषयः तरुणतरः खेदोयस्य पुनः कथंभूतस्य स्वहितशतहंतुः स्वस्यैवहितानिपथ्यानितेषांशतं तस्यहंतानाश ११
कः तस्यअतएव पुनः कथंभूतस्य जडधियः जडाधीर्यस्यतस्य १९ ७ ७

पूर्वंदयाविधेयेत्युक्तं इदानींकिंविषयिणीदयेत्याकांक्षायां तवजलं ममपुनः भवनमेवदूरीकरोतुइ
तिप्रार्थयते मरुदिति भोमातः तेतवजलं ममजगन्नाथस्य जननजालं जननस्य जन्मनः जनुर्जन
नजन्मानीत्यमरः तस्यजालंसमूहः तत् जालंसमूह आनायइत्यमरः जरयतु नाशयतु जृवयो
हानौ स्वार्थेणिजंतः जनीजृष् इतिमित्वेमितांन्हस्वइत्युपधान्हस्वः कथंभूतंजलं मरुल्लीलालोलल्लह
रिलुलितांभोजपटलीस्खलत्पांसुव्रातच्छुरणविसरत्कौंकुमरुचि मरुतः वायोः लीलाविलासः ते
नलोलंसश्चंचलायालहर्यः वीचयः ताभिः लुलितानि लोलानि यानि अंभोजानिकमलानि तेषां
पटलीसमूहः तस्याः स्खलंतः पतंतोयेपांसवः रजांसि तेषांव्रातःसमूहः तस्यच्छुरणंअंगलेपः तेन

मरुल्लीलालोलल्लहरिलुलितांभोजपटलीस्खलत्पांसुव्रातच्छुरणविसरत्कौंकुमरुचि

विसरंतीप्रसरणशीला तादृशीकौंकुमरुचिर्दीप्तिर्यस्यतत् कमलरजः पतनेनात्यंतमारक्तमितिभा
वः पुनः सुरस्त्रीवक्षोजक्षरदगरुजंबालजटिलं सुराणामिंद्रादिदेवानांस्त्रियः इंद्राण्यादयः तासांव
क्षोजाः स्तनाः तेभ्यः क्षरन् पतन् य अगरुजंबालः कृष्णचंदनपंकः वंशकागरुराजार्हेत्यमरः नि
षद्वरस्तुजंबालः पंकोस्त्रीत्यमरः तेनजटिलंसजटं जटाशब्दात्तुदादित्वाल्लच् पुं० जंबालं जंबालः पंकः
अस्तियस्मिन्तत् यद्वा जंबालः शैवालंअस्तियस्मिन् यद्वाजंबालाः मदनद्रुमाः धत्तूरवृक्षाइत्यर्थः तेसंत्यस्मि
न्तत् तथाच कोशः जंबालः शैवलेपंकेजगलेमदनद्रुमइतिपक्षत्रयेपि जंबालशब्दान्मत्वर्थीयोअर्शआद्यच्
मरुल्लीलालोलल्लहरि[illegible]हराफल्योःसमासंकृत्वा पश्चाद्विसरंतीशब्देनसमासेपुंवद्भा
वात् करु[illegible]

...काशात्तालव्योपिपांसुशब्दः २० इदानीमुसन्निस्थान
निवासस्थानव्यापारसौष्ठवेनजगदपेक्षयातवउत्कर्षोवर्ततइत्याह समुत्पत्तिरिति भोजननि जगतः विश्वस्मा
त्तवोत्कर्षः आधिक्यंकस्माद्धेतोर्नजागर्तुनास्त्तां अपितुसर्वस्माद्धेतोरुत्कर्षोवर्त्ततइत्यर्थः उत्कर्षप्रतिपादकहे
तूनाह समुत्पत्तिरिति तवसमुत्पत्तिः सम्यगुत्पत्तिः उद्भवः पद्मारमणपदपद्मामलनखात् पद्मायाः ल
क्ष्म्याः लक्ष्मीः पद्मालयापद्मेत्यमरः रमणः पतिः विष्णुः तस्यपदंचरणकमलं तस्यामलनखः तस्माद्भव
ति जनिकर्त्तुरित्यपादानत्वं तवनिवासः स्थितिः कंदर्पप्रतिभटजटाजूटभवने कंदर्पस्यानंगस्य कंदर्पो

सुरस्त्रीवक्षोजक्षरदगरुजंबालजटिलंजलंतेजंबालंममजननजालंजरयतु २० समुत्प
त्तिःपद्मारमणपदपद्मामलनखान्निवासःकंदर्पप्रतिभटजटाजूटभवने अथायंव्यासंगो
हतपतितनिस्तारणविधौनकस्माद्धुत्कर्षस्तवजननिजागर्तिजगति २१ र्पकोनंगइत्यम

रः प्रतिभटः प्रतिपक्षी शिवः तस्यजटाजूटः कपर्दः सएवभवनंगृहं तत्रवर्त्ततइतिशेषः अथानंतरं
तवायंव्यासंगः उद्योगः हतपतितनिस्तारणविधौ हताः शत्रुभिः शस्त्रादिनामारिताः प्रायश्चित्तिनः ते
षांनिस्तारणंउद्धारः तस्यविधिः करणंतत्रवर्त्ततइतिशेषः विधिर्विधानेदैवेचेत्यमरः २५ इदानींहराशिरसि
निवसंत्याः विष्णुपदोद्भूतायाः तवोपमेयाकापिनदीनास्तीत्याहनगेभ्यइति भोजननि कविभिः पंडितैः सं
ख्यावान्पंडितः कविरित्यमरः यस्यांदीयेत तादृशीकावर्त्तते तवतुलालेशः तुलायाः उपमायाः लेशः लवः ५२
लवलेशकणाणवइत्यमरः यस्यांदीयेत् तादृशीकावर्त्तते अपितुनकापीत्यर्थः ननुकृष्णाद्योबह्व्यो वर्त्तं

तेइतिचेत्तत्राह नगेभ्यइति नगेभ्यः पर्वतेभ्यः नगोप्राणिष्वन्यतरस्यामितिपाक्षिकनलोपाभावः यांतीना मागच्छंतीनांमध्येयतश्चनिर्धारणमितिषष्ठी कतमयातटिन्यापुराणांनगराणांसंहर्त्तुर्दाहकस्यशिवस्यकप र्दः जटाजूटः अधिरुरुहे अध्यारूढः नगेभ्योयांतीनांतटिनीनांमध्येक यावातटिन्याश्रीभर्त्तुर्विष्णोः पद कमलंचरणपंकजंसलिलैः अक्षालिधौतमितित्वंकथय अर्थात् अस्मान्प्रतिवद एवंचतत्कार्यकरणाभावा त् काप्युपमेयानेतिभावः इदमेवमनसिनिधायत्वामहंशरणंगतइत्याकूतं अक्षालीत्यत्रचिण्भावकर्मणोरि तिकर्मणिचिण् आदौपूर्वार्धयोजयित्वापश्चादुत्तरार्धयोज्यं २२ इदानीमेवंजननिमनोरथदायिनित्वयि

नगेभ्योयांतीनांकथयतटिनीनांकतमयापुराणांसंहर्त्तुःसुरधुनिकपर्दोधिरुरुहे कया वाश्रीभर्त्तुःपदकमलमक्षालिसलिलैस्तुलालेशोयस्यांतवजननिदीयेतकविभिः २२

विधत्तांनिःशंकंनिरवधिसमाधिंविधिरहोसुखंशेषेशेतांहरिरविरतंनृत्यतुहरः

सत्यांब्रह्मादीनांप्रयोजनमेवनास्तीत्याह विधत्तामिति भोजननि जनयति विश्वमुत्पादयति इति जननी विश्वमाता तत्संबोधनं जगति विश्वस्मिन् कामानां मनोरथानां कर्मणिषष्ठी सवित्रीउत्पादयित्री यदि ...विश्वमाता त्वं जागर्ति अस्ति तर्हिविधिः विदधातिविश्वमितिविधिः ब्रह्माविधात्रोवेधेश्चेतिवेधा ...श्च निरवधिसमाधिंनिर्गतः अवधिर्यामादिरूपामर्यादायस्यतादृशोयः समाधिः चित्तवृत्ति ...कं निर्गताशंकायस्मिन् कर्मणियथाभवतितथामयि निर्व्यापारे जगदुत्पत्तिः कथंभवि ... तरिः हरतिसर्वेषांदुःखमितिहरिः अन्चइरिण्योणादिकोइः

... त्यमित्यनेननिद्राभंगजनकः जगद्रक्षणरूपोपाधिः

तिहरः हरतिविश्वमितिहरः पञ्चाद्यनृशिवः अविरतं निरंतरंयथास्यात्तथा नृत्यतुनृत्यं

...रतमित्यनेनमध्येकार्यांतररहिततयानृत्येविरामोमास्त्वितिसूचितं प्रायश्चित्तैः कृतं स्व

...शुद्धिकरणाभावात्तानिव्यर्थानीतिभावः अथानंतरंतपोदानयजनैः तपांसिकृच्छ्रचांद्रायणादीनि

दानानि गजाश्वादीनि यजनानिदेवपूजायागादीनि तैरलं तैःसाध्यंनास्तीतिभावः गम्यमानक्रिया

प्रतिकारकत्वात्तृतीया अहोइत्याश्चर्येअनेकेषांकार्यमेकैवत्वंकरोषीत्याश्चर्यं २३ इदानींअनाथइ

कृतंप्रायश्चित्तैरलमथतपोदानयजनैःसावित्रीकामानांयदिजगतिजागर्तिजननि २३

अनाथःस्नेहार्द्रोविगलितगतिःपुण्यगतिदांपतन्विश्वोद्धर्गदविगलितःसिद्धभि

षजं त्यादिविशेषणयुक्तोहंस्नेहार्द्रामित्यादिविशेषणयुक्तांत्वांप्राप्तोस्मि अतस्त्वं स्वमहत्त्वयो

ग्यंकुर्वित्याह अनाथइति भोगंगे अयमहंशिशुः श्यतिदिनेदिने कृशोभवतीतिशिशुः शावकः शःकि

त्सन्वच्चेत्यादिसूत्रेणसाधुः पृथुकःशावकः शिशुरित्यमरः मातरं जननींत्वांप्राप्तोस्मि इहविषये त्वं

समुचितं सम्यगुचितंयोग्यंविदध्याः कुरु शरणागतंबालंमां मातृत्वान्मात्यजेतिभावः कीदृशोऽहंकीदृ

शींत्वां अनाथः दीनः स्वाम्यंतराभाववानित्यर्थः स्नेहार्द्रः स्नेहेनप्रीत्या आर्द्रःक्लिन्नः आर्द्रसार्द्रक्लिन्नमित्य

मरःपुनः कीदृशोहंकीदृशींत्वां विगलितगतिः विगलितानष्टागतिः गमनंयस्यसः यद्वा विगलितापाप १३

बाहुल्येननष्टागतिः पुण्यश्लोक गतिः गमनंयस्यसः पुण्यगतिदां पुण्येषुगतिः तांतदाति सातां यद्वा

पुण्येषु पुण्यलोकेषु गतिदां पुनस्तत्किम् पतन् पतितः विश्वोद्धर्त्रीं उद्धारकर्त्रीं त्रिभुवनविधातुश्चकलह इतिवत् शेषषष्ठ्या समासः एवंचविश्वांतर्गतस्यममोद्धारं करिष्यस्येवेतिभावः पुन० गदविगलितः गदैः आंतकैः रोगैरित्यर्थः विगलितः विशेषेणगलितः जर्जरितः यक्ष्मांतकगदाबाधाः शब्दाः पर्यायवाचका इति सिद्धभिषजं सिद्धौषधम् सिद्धवैद्यरूपमित्यर्थः रोगहार्यगदंकारो भिषग्वैद्यौ चिकित्सक इत्यमरः पुन० तृष्णाकुलितहृदयः तृष्णया पिपासया आकुलितं व्याप्तं हृदयं यस्य सः सुधासिंधुं सुधाया अमृतस्य सिंधुं समुद्रं यद्वा सुधायाः सिंधुं देशं यद्वा सुधायाः सिंधुं नदीं तथाचामरः देशे नदविशेषेऽब्धौ सिंधुर्ना सरिति स्त्रियामित्यमरः अत्र परिकरालंकारः साभिप्रायविशेषणानां सत्वात् तदुक्तं कुवलयानंदे अलं

सुधासिंधुं तृष्णाकुलितहृदयो मातरमयं शिशुः संप्राप्तस्त्वामहमिह विदध्याः समुचितं २४

विलीनो वैवस्वतनगरकोलाहलभरो गता दूता दूरं क्वचिदपि परेतान्मृगयितुम्

कारः परिकरः साभिप्राये विशेषण इति २४ इदानीं यदारभ्य तव कथा भूलोकमागता तदारभ्य यमनगरकोलाहलः शांतः तद्दूता अपि दूरदेशं गताः विमानसंघश्च देववीथीर्विदलयतीत्याह विलीन इति भो जननि यदवधि यदारभ्यते तव कल्याणी कल्याणकारिका कथा महीमंडलमगात् इणो गा लुङीति गादेशे गाति स्थेति सिचो लुक् तदारभ्य वैवस्वतनगरकोलाहलभरः वैवस्वतस्यांतकस्य वैवस्वतांतक इत्यमरः नगरं पुरं [illegible] समूहः कोलाहलः कलकल इत्यमरः विलीनः विशेषेण लीनः [illegible] पदपि नास्तीति पूर्वं तत्र पापिगमनेन तेषां ताडनात् को

...स्थनपापाभावात् कस्यापितत्रगमनाभावेनताडनाद्य
...नसंदेशहारकाअपि स्यात्संदेशहरोदूतइत्यमरः क्वचिद्देशेपरेता
नृशवान् मृगयितुं अन्वेषितुं दूरगंताः यस्मिन्देशेत्वत्कथाश्रवणंनास्तितत्रगताइत्यर्थः ननुयमनगर
गमनाभावे त्वत्कथाश्रवणिनः क्वगच्छंतीतिचेत्तत्राह विमानानां विशिष्टं आनयंतिये विगतंमानंवा
येषांतेविमानाः व्योमयानानि व्योमयानंविमानोस्त्रीत्यमरः तेषांव्रातोनिकरः स्तोमौघनिकरव्रातेत्यम
रः दिविषदां दिविसीदंतितेदिविषदोदेवाः तेषां षद्लृविशरणगत्यवसादनेष्विति धातोः सत्सूद्विषेतिक्विप्

विमानानांव्रातोविदलयतिवीथीर्दिविषदांकथातेकल्याणीयदवधिमहीमंडलमगात् २५
स्फुरत्कामक्रोधप्रबलतरसंजातजटिलज्वरज्वालाजालज्वलितवपुषांनःप्रतिदिनम्

सुद्द्युभ्यांचेतिङेरलुक् सुषामादित्वात्षत्वं वीथीः मार्गान् देवगमनमार्गानित्यर्थः विदलयतिविशेषेणद
लयति विदारयति त्वत्कथाश्रवणमाहात्म्येनसर्वेषांविमानैर्गमनात् वारंवारंविमानसंबंधात् स्वनितानिव
करोतीत्यर्थः २५ इदानींतवजलकणाः कामक्रोधजनितज्वरदग्धशरीरिणामस्माकंसंतापशमनंकुर्वंति
तिप्रार्थयते स्फुरदिति दिव्यसरितः दिविआकाशेभवादिव्या भवार्थेदिगादित्वाद्यत् साचासौ सरिच्चत-
स्याः गंगायाः मरुदुल्लासलहरीछटाचंचत्पाथःकणसरणयः मरुतः वायोरुल्लासः संबंधः गमनंवा ल
ससंश्लेषणगमनयोरितिधातोर्भावेघञ् तेनयालहर्यः तासांयाश्छटाः परंपराः ताभिश्चंचतन् उद्धत्
यत्पाथः उदकं कबंधमुदकंपाथइत्यमरः तस्यकणाः तुषाराः तेषांसरणयः पंक्तयः अस्माकंकमपि १४

ओषधादिभिरसाध्यतया अपहर्त्तुमशक्यमपिसंतापंहरंतां नाशयंतु कथंभूतानांनः प्रतिदिनं दिने दिनेइति प्रतिदिनमव्ययं विभक्तीतिसूत्रेयोग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानीतिचत्वारोयथाशब्दार्थाः तत्रवीप्सायामव्ययीभावः स्फुरत्कामक्रोधप्रबलतरसंजातजटिलज्वरज्वालाज्वालज्वलितवपुषां कामोभिलाषः कामः पंचशरः स्मरइत्यमरः क्रोधः अमर्षः कोपक्रोधामर्षरोषइत्यमरः स्फुरंतौदेदीप्यमानौचतौकामक्रोधौचताभ्याम् प्रबलतरः अतिशयितः संजातः उत्पन्नः अतएवजटिला शिखावान् एतादृशोज्वरः तस्यज्वालाः अर्चयः तासांजालंसमूहः तेनज्वलितंदग्धंतादृशंवपुः शरीरंयेषां तेषां २६ पूर्वजलकणाः संतापंहरंतामित्युक्तं इदानींतापबाहुल्यात् कणानांकथंतत्संभवतीतिचेत् त

हरंतांसंतापंकमपिमरुदुल्लासलहरीछटाचंचत्पाथः कणसरणयोदिव्यसरितः २६

इदंहिब्रह्मांडंसकलभुवनाभोगभवनंतरंगैर्यस्यांतर्लुठतिपरितस्तिंदुकमिव

वजलानांसंघातः अस्माकंतापशमनंकरोत्विति प्रार्थयते इदमिति भोजननि श्रीकंठप्रवितततजटाजूटजटिलः प्रवितततः विस्तृतः सचासौ जटाजूटश्च श्रीकंठस्यप्रविततजटाजूटः तेनजटिलः सजटः एतादृशः सएषः नवजलानांसंघातः समुदायः नः अस्माकं तापं हरतुसकः यस्यजलानांसंघातस्यांतर्मध्ये सकलभुवनाभोगभुवनम् सकलभुवनानां चतुर्दशभुवनानां आसमंताद्भोगः स्फारवं भोगः स्फारवेन करुणा [illegible] तां आभोगाः परिपूर्णता आभोगः परिपूर्णतेत्यमरः [illegible] इयत्के प्रधानेइति सूत्रेणातृतीया परितस्तिंदुकमिव

...इभुवनीतिभाषायांप्रसिद्धिः लुठति लुठसंश्लेषणेलु

दादिः ... ब्रह्मांडमपिस्थितम् सोपिशिवकपर्देस्थित इत्याश्चर्यं
अत्रोत्तरोत्तरमुत्कर्षस्यसत्वात् सारालंकारः तदुक्तं अप्पय्यदीक्षितैः कुवलयानंदे उत्तरोत्तरमुत्कर्षः
सार इत्यभिधीयतइति २७ इदानीं ननुरे तीर्थान्तराणिशिवादिदेवांश्चविहायमामेवकिंस्तोषीतिचेत्तीर्था
निमदुद्धरणविधौलज्जंते शिवादयश्चकर्णेहस्तंस्थापयंति त्वंतुमातृत्वेनदयायामांपुनानातेषां पापना
शनाभिमानंनाशयसीत्याह अपंतइति भोअनुकंपार्द्रहृदये अंब अनुकंपादया तया आर्द्रंहृदयम्

सएष श्रीकंठ प्रविततजटाजूटजटिलोजलानांसंघात स्तवजननितापंहरतुनः २७
अपंतेतीर्थानित्वरितमिहयस्योद्धृतिविधौकरंकर्णेकुर्वंत्यपि किलकपालिप्रभृतयः इ
मंतंमामंबत्वमियमनुकंपार्द्रहृदये पुनानासर्वेषामघमथनदर्पंदलयसि २८

यस्याःसातत्संबोधनम् एतादृशि अंबजननि अंबत्वेनत्यागानर्हत्वा तं इमं तवसमीपेवर्तमानं मांज
गन्नाथं पुनाना पुनातितच्छीला ताच्छील्येशानच् पवित्रीकुर्वाणाइयंत्वं तेषांतीर्थादीनां अघमथनदर्पं
अघस्य पापस्यनाशनं तस्यदर्पः गर्वः तंदलयसि विदारयसि नाशयसीत्यर्थः एतावत्कालपर्यं
तं तेषांपरमगर्वःस्थितः वयंसर्वेषांपापनाशनंकुर्मः इदानींतुममपरमपातकिनः तद्धस्तेनोद्धारणाभा
वात् त्वयाउद्धारणस्यकृतत्वात् तेषांगर्वोगतइतिभावः ननु तेषांहस्तेनकिमित्युद्धरणंनभवतीतिचेत्त १५
त्राह तंकं इहयस्यउद्धृतिविधौ उद्धृतेः विधिः करणंतत्र विधिर्विधानेदैवेचेत्यमरः तीर्थानिगोदाव

र्यादीनि त्वरितं यथा स्यात्तथा महापातकिनो मम दर्शनसमय एवेति भावः अपं ते लज्जितानि भवंति स्वहस्ते
न महापातकिनो मम मोद्धारणाभावात् लज्जेति भावः पुनस्त्वं कं यस्योच्चारणविधौ कपालिप्रभृतयोपि कपा
लीप्रभृतिः आदिर्येषां ते विष्णवादयोपि कर्णे हस्तं कुर्वंति स्थापयंतीत्यर्थः स्वहस्तेन एतस्योद्धृत्यभावात्
एतस्य किमपि न श्रोतव्यमित्याशयेन कर्णे हस्तन्यास इति भावः करं कर्णे इत्येकवचनं तु द्वितीयकर्णेन श्रोतव्यं
यदि स्वहस्तेन एतदीयं कार्यं भविष्यति चेत्करिष्यामः नो चेन्नेत्येतदर्थबोधनाय २८ इदानीमपरिमित
संशयेन पापाचरणे निवृत्तैश्चांडालानां समूहैरपि त्यक्तानां पापानामाकरं मां पुनातु त्वं यत्नं कुर्वत्यास्तव
स्तुतिं कर्तुं नरपशुरहं कथं शक्नुयामित्यहंकारपरिहरणव्याजेनाह श्वपाकानामिति भोजननि मामुद्ध
श्वपाकानां व्रातैरमितविचिकित्साविचलितैर्विमुक्तानामेकं किल सदनमेनः परिषदाम्
र्तुं परिकरं कटिबंधं विवेकमारंभयत्नं वा प्रगाढगात्रैकबंधे विवेकारंभयोरिति विश्वः यत्नारंभौ परिकरा
विति त्रिकांडशेषः घटयंत्याः कुर्वंत्याः तव श्लाघां स्तुतिं कर्तुं नरपशुरिवेति व्याघ्रादित्वात्समासः सर्वान-
विशेषेण पश्यतीति पशुः हिताहितज्ञानशून्याः मूर्ख इति यावत् एतादृशोहं कथमिव केनापि प्रकारेण सम
र्थः अपि तु न कथमपीत्यर्थः मन्मतिमांद्यात्तव गुणानामपारत्वाच्चेति भावः अहो इत्याश्चर्ये परमपातकिनं
मां पुनातु यत्नादिकं करोषीत्याश्चर्यं कथंभूतं मां अमितविचिकित्साविचलितैः अमिताश्च परिमिताब-
ह्वीत्यर्थः साचासौ विचिकित्सा च अतः परं पातकानि कर्तव्यानि वा न वेत्याकारः संशयः विचिकित्सा तु सं
शये ... करुणा ... त्सरससंस्थायीभावः कित संशय इति धातोर्गुप्तिज्

...धयेदाप् अमितविचिकित्सायाश्चलितैः पातकानिरत्नैः
एतादृशैः श्वपाकाना श्वानपचातितश्वपाकाः चांडालाः यद्यपिपचादिगणेश्वपचेति अजंतंनिपातितं तथा
पिन्यंकादिगणेश्वपाकशब्दस्यपाठात्पक्षेकर्मण्यणिकुत्वं निषादश्वपचावंतेवासिचांडालपुल्कसाइत्यमरः
तेषांव्रातैः समूहैः नलेकेनद्वाभ्यांवाविमुक्तानांविशेषेणमुक्तानांविशेषश्चमनः पूर्वकृत्सक्तानां नतुलोकः
लज्जयेति एतादृशीनामेनः परिषदाम् एनसांपापानांपरिषदः सभाः समूहाइत्यर्थः तासामेकमद्वितीं
यंसदनंगृहं किलनिश्चयेनप्रसिद्धौवा आश्चर्यैवा एतादृशमपिपापिनंमांपुनीतुं उद्युक्तासीत्याश्चर्यम् २९

अहोमामुद्धर्तुंजननिघटयंत्याःपरिकरंतवःश्लाघांकर्तुंकथमिवसमर्थोनरपशुः २९
नकोप्येतावंतंखलुसमयमारभ्यमिलितोयदुद्धारादाराद्भवतिजगतोविस्मयभरः॥

इदानींकस्यचिन्महापातकिनः समुद्धरणेनजगतः आश्चर्यंसंपादनीयमिति तवमहतीच्छास्थितासा
एतावत्कालपर्यंतं तादृशस्यकस्यचित्पातकिनः अभावान्नैवपूर्णा अहंतुतादृशे च्छांसफलीकर्तुंप्राप्तोस्मि
अतः ममोद्धरणेनस्वेच्छासाफल्यंकुर्वितिमार्थयते नेति भोऽम्ब एतावंतंसमयमारभ्य एतावत्कालप-
र्यंतंकोपिकश्चनपातकीनमिलितः नप्राप्तोमयेतिशेषः आरात् शीघ्रम् यदुद्धारात् यस्योद्धारस्तस्मा
त् जगतः विस्मयभरः भवतीति तेनव मनसिचिरकालंबहुकालम् स्थितवतीं तिष्ठतीति स्थितवती
तामिमांपूर्वोक्तामीहामिच्छांसफलयितुं असफला सफलाभवतितथाकर्तुं भृशादित्वात्क्यङिक्य-
ङत्रानिनोश्चेतिपुंस्त्वं तुमुन् अयमहंजगन्नाथः संप्राप्तः अस्मीतिशेषः नः अस्मान् प्रणयपापंनिरस्यो

त्तमांगतिंनयेत्यर्थः उपसर्गादसमासेपीतिणत्वम् अंबेत्यनेनतवजननिलंचेदहंतवपुत्रः एवंचमातुरिच्छा
सत्पुत्रेणमयासफलीकर्त्तव्येतिसत्पुत्रधर्मएवायमितिसूचितम् ३० इदानींममानेकदुष्टगुणान्श्रुत्वात्वांवि
ना अन्यः कश्चनममसुखनिरीक्षणमपिनकुर्यादित्याह श्ववृत्तीति भोमातः श्ववृत्तिव्यासंगः श्वनः वृत्तिः
इतस्ततोभ्रमणम् उच्छिष्टभक्षणाचरणादिनद्भ्यासंगः उद्योगः मयाकृतइतिशेषः अथानंतरंनियतं
नियमेनमिथ्याप्रलपनं असत्यानर्थकमपिभाषणंकृतं प्रलापोनर्थकंवचइत्यमरः परमपुण्यशीलेनयुधि
ष्ठिरेणसकृन्मिथ्योक्तमिति तज्जन्यपापवशादंतरिक्षगस्तद्रथः भूमौलग्नइतिस्पष्टंमहाभारते मयातु

इतीमामीहांतेमनसिचिरकालंस्थितवतीमयंसंप्राप्तोहंसफलयितुमंबप्रणयनः ३० श्ववृ
त्तिव्यासंगोनियतमतमिथ्याप्रलपनंकुतर्केष्वभ्यासःसततपरपैशून्यमननम्॥

सत्सत्यागपूर्वकंसर्वदैवतत्कृतमितिमत्पापसंख्यैवनेत्याकूतम् कुतर्केषुकुत्सितानांपरस्त्रीगमनपर
गृहदारादिरूपकर्मणां तर्काःऊहाः तेषु यद्वा कुत्सिताश्चतेतर्कास्तेषु यद्वा साक्षात्ब्रह्मविद्यायाअप्रति
पादकत्वेनपरजयेच्छयाच कुत्सितास्तर्काः तर्कशास्त्रग्रंथाः तेषुअभ्यासोपिकृतः सततपरपैशून्यम
ननमपिकृतंपिशुनस्यसूचकस्यभावः पैशून्यं द्वैजिह्व्यंपरेषांपैशून्यंतस्यमननंचिंतनम् अभ्यस्तमि
तियावत्सततंनिरंतरंचतत् पैशून्यमननंचतदपिकृतम् एवंप्रकारेणममतु पुनर्गुणगणान् श्रावंश्रा
वंश्रुत्वाश्रुत्वाद्वह्े [illegible] ...मितिसूत्रेणऋतेयोगेत्वादितिपंचमी कोनामक्षणमपिवदनं अ-
[illegible] वांनि करु[illegible] ...र्थः तवतुमातृत्वेनदयाबाहुल्यादीदृशस्यममसुख

...निर्यः कुपुत्रोजायेतक्कचिदपिकुमातानभवति इति स.

३१ इदानींयस्यमनुष्यस्य... परमरमणीयंतवशरीरं नदृष्टं यस्यकर्णाभ्यांतवलहरिकोलाहल
श्चनश्रुतः तस्यनेत्रेव्यर्थे कर्णौचव्यर्थावित्याहविशालाभ्यामितिअत्रयस्यतस्येत्यध्याहारः भोजननि
यस्यमनुजस्यमानवस्य मनुजामानवानराइत्यमरः याभ्यांनेत्राभ्यांपरमरमणीयाअतिसुंदरी आन-
दर्शनिकारणंसूचितम् एतादृशीतवतनुः शरीरं न आलीढा नसादरमवलोकिता तस्यमनुजस्यविशा
लाभ्यांआकर्णविस्तृताभ्यां आभ्यांनयनाभ्यांकृत्वा इहभूलोके किंफलं नकिमपीत्यर्थः यद्वा इहना

अविश्रावंश्रावंममतुपुनरेवंगुणगणानृतेत्वन्कोनामक्षणमपिनिरीक्षेतवदनम् ३१वि
शालाभ्यामाभ्यांकिमिहनयनाभ्यांखलुफलंनयाभ्यामालीढापरमरमणीयातवतनुः॥

लीढेतियोजनायस्य ययोः श्रवणयोः कर्णयोरंतर्मध्येनव लहरिलीलाकलकलः लहरीणांलीलाक्रीडा
तस्याः कलकलः कोलाहलः कोलाहलः कलकल इत्यमरः इहनयातः नप्राप्तः तस्यतयोः श्रव-
णयोः अयंश्रवणरूपः न्यक्कारः धिक्कारः अस्त्वितिशेषः खलुनिश्चयेन यद्वा ययोः श्रवणयोः अं
तर्मध्ये तवलहरिलीलाकलकलः नयातः ताभ्यांश्रवणाभ्यांकृत्वाकिंफलम् नकिमपीत्यर्थः परंतु
अयंअदर्शनाश्रवणरूपन्यक्कारोमनुजस्यनतिंद्रियाणाम् इंद्रियव्यापारस्यमनुष्यव्यापाराधीनत्वादि-
तिभावः तदुक्तं करणंहिसकर्तृकमिति एतत्पक्षेयस्यतस्येतिनाध्याहारः ताभ्यामित्यस्यचाध्याहारः १७
अहंतुसर्वदैवतवतनुंपश्यामि लहरीशब्दंचशृणोमि अतोममनेत्रकर्णनव्यर्थमित्याकूतं एवंचशीघ्रं मां

पुनीहीतिभावः अत्रविनोक्तिध्वनिरलंकारः त्वद्दर्शनंविनानयनयोः त्वल्लहरिकोलाहलश्रवणंविनाश्रव
णयोश्चरमणीयत्वस्यफलमस्याधिकाराभ्यांव्यंजनात् ३२ इदानींपुण्यवंतोविमानैः सुरपुरंस्वच्छंदंयांति
पापिनस्तुपराधीनाः संतोनरकमध्येपतंतीतिकोटिद्वयंयत्रदेशेत्वंनासितत्रसंभवति यत्रतुनिखिल
पापनाशिनीत्वमसितत्रद्वितीयकोटेरभावात् आद्यकोटिरेवसंभवतीत्याह विमानैरिति भोजनमि
सुकृतिनः पुण्यवंतः विमानैः सुरपुरं सुराणां देवानां पूर्नगरीनां यद्वा सुराणांपुरंनगरंस्वर्गं स्वच्छं
दंयथास्यात्तथानतुनद्रूणादिवशेनअयंतेगच्छंतिपापाः पापरूपाः जीवाः पापबाहुल्येन पापपुरुष-

अयंहित्यक्कारोजननिमनुजस्यश्रवणयोर्ययोमांतर्यो नस्तवलहरिलीलाकलकलः ३२
विमानैःस्वच्छंदंसुरपुरमयंतेसुकृतिनःपतंतिद्वास्यापाजननिनरकांतःपरवशाः॥

योस्त्रिमुनिव्याकरणमितिशब्दभेदः यद्वा पापमस्तियेषांतेपापाः इतिमत्वर्थेअर्शआद्यच् अतएव पा
पोहंपापकर्माहमित्यादिप्रयोगाः संगच्छंत इतिदिक् पापमर्हंतीतिवा परवशाः संतः यमगणाधीनाः
संत इत्यर्थः नरकांतः नरकस्यांतर्मध्येद्राक्शीघ्रम् यमनगरगमनसमयएवेत्यर्थः पतंति भोमातः
अयंविभागः विषयव्यवस्था तस्मिन्नशुभमयमूर्तौ अशुभमयी अकल्याणप्रचुरामूर्तिः तनुर्यस्य
तस्मिन् स्त्रियाः पुंवदितिपुंवद्भावः देशस्याशुभमयत्वं तत्रतवस्थितेरभावादेव एतादृशेजनपदेदेशे
नीवृज्जनपदोदेशइत्यमरः अस्त्विनिशेषः यद्वा तस्मिन्नशुभमयमूर्तौजनपदे अयंविभागइति यो
जना [illegible] कलुषा मनुजानां मनुष्याणाम् अशेषकलुषं-

सनत ... र्पैे नाएतादृशीत्वंनासि यत्रत्वंदलितमनुजाशेषक-
लुषासती नासीतिवायोजना एवंचार्थादेतादृशीत्वंयत्रासितत्रकस्यापिपातकिन अभावात्सर्वेपिविमा
नैः स्फरपुरंगच्छंतीति आद्यकोटिरेवस्थितेतिभावः अत्रपरिकरालंकारः दलितमनुजाशेषकलुषेति
साभिप्रायविशेषणस्य सत्वात् तल्लक्षणंतु पूर्वमुक्तं ३२ इदानींसमस्तमहापातकिनोपिमरणसमये
त्वयिशरीरंत्यक्तवंतः संतः उत्तमलोकंगच्छंतीत्याह अपीति अत्रयेतेइत्यध्याहारः पूर्वश्लोकात्पापाइ
त्यनुवर्तते तथाचैवंयोजना भोअंब तेपापाः पापिनः पुरुषाः अंतेमरणसमये त्वयितनुंशरीरंविहाय

विभागोयंतस्मिन्नशक्रभमयमूर्त्तौजनपदेनयत्रत्वल्लीलादलितमनुजाशेषकलुषा ३२

अपिघ्नंतोविप्रानविरतमुशंतोगुरुसतीःपिबंतोमैरेयंपुनरपिहरंतश्चकनकम् ॥

संत्यज्य अतनुदानाध्वरजुषां न तनुअल्पमित्यतनु महत् तच्चतद्दानंचतेनयेऽध्वराःसर्वस्वदक्षिणा
यज्ञाः यज्ञः सवोध्वरोयागइत्यमरः यद्वा अतनूनिमहांतिदानानियेषु तेचतेअध्वराश्च यद्वा अ
तनुदानानिचाध्वराश्च यद्वा नतनुः कोपः तेनयानिदानानि अध्वराश्च तनुः कोपेत्वचिस्त्रीस्या
त्रिष्वल्पेविरलेकृशइतिमेदिनी तान्जुषंति सेवंतेकुर्वंतीत्यर्थः ते अतनुदानाध्वरजुषः तेषामु
परि उपरिलोके क्रीडंतिविहरंति महादानयागप्राप्यलोकोपरितनलोकंगच्छंतीत्यर्थः तथाच
गंगातनुत्यागादेवोत्तमलोकप्राप्तौ परमोत्कृष्टसाध्यमहादानयागेषुनकिंचिदधिकंफलमितिभावः १८
नेके येपापाः विप्रानपिब्राह्मणानपि अविरतंनिरंतरंयथास्यात्तथा इदंसर्वक्रियान्वयि घ्नंतिनेघ्नं

तः हनधातोः शतरिगमहनेत्युपधालोपः नलोकेतिषष्ठीनिषेधाद्विमानित्यादिद्वितीया पुनः तेके
ये गुरुसतीः गृणातिबोधकंकरोतिगुरुः कृग्रोरुच्चेत्युणादिसूत्रेणगृशब्दे इत्यस्मात्कुप्रत्ययः उ
कारश्चांतादेशः तथाचोपनयनादर्वाचीनसंस्कारपूर्वकंवेदाध्यापकोमंत्रोपदेशकश्चगुरुः स्याभि
षेकादिकृद्गुरुरित्यमरः तस्यसत्यः पतिव्रताः स्त्रियः सतीसाध्वीपतिव्रतेत्यमरः ताः उशंतः
उशंति इच्छंतितिते उशंतः वशकांतौअदादिः तत्रहिकांतिरिच्छेत्युक्तम् तस्माच्छतरिग्रहिज्येतिसं
प्रसारणं यद्वा गुरोः पितुः सतीः मातृरित्यर्थः यद्वा गुरोः श्रेष्ठ पितृव्य भ्रातृश्वशुरमातुलादेः
सतीः यद्वा गुरोः बृहस्पतेः सतीः तस्यएकस्त्रीत्वेपिजात्यभिप्रायेण बहुवचनमिति यथाकथं

विहायत्वय्यंतेतनुमतनुदानाध्वरजुषामुपर्यंबक्रीडंत्यखिलसुरसंभावितपदाः ३४

चिद्योज्यं तथाचानेकार्थकोशः गुरुः पितागुरुः श्रेष्ठोगुरुः सुरपुरोहितः दुर्बहोपिगुरुः प्रो
क्तोगुरुः शिष्याभिसेवकइति पु० येमैरेयंसीधुंमैरेयमासवः सीधुरित्यमरः पिबंतः पानंकु
र्वंतः पु० तेकेये कनकंसुवर्णं सुवर्णंकनकमित्यमरः हरंतः चोरयंतः कथंभूताः तेअखि-
लसुरसंभावितपदाः अखिलसुरैः समस्तदेवैः संभावितंसंभावनायुक्तंकृतं पूजितमितिया
वत् तादृशंपदंचरणंयेषांते बहुवचनांतेनसमासः यद्वा अखिलसुराणांसंभावितंप्राप्तंताहृशं
पदंस्थानं यैस्ते सप्तमीविशेषणेइतिज्ञापकात्सप्तमधिकरणपदो बहुव्रीहिर्वा कर्त्तव्यः संपूर्वकभूधा
तोर्णिजं... ... ३४ ५ ५ ५
...यंति करुणा...

इदानीं [illegible] वायुः तल्लहरिसंबंधमाहात्म्येनत्रिभुवनंपवित्रीकरोती
१९ त्याह अलभ्यमिति भोअंब सोपिपरप्राणहारित्वादिगुणयुक्तोपिपवमानः प्रभंजनः पवमानप्रभंजनाइ
त्यमरः त्वदीयानांतवइमाः त्वदीयाः युष्मदस्मदोरन्यतरस्यांखञ्चेतिचाच्छः प्रत्ययोत्तरपदयोश्चेति–
त्वादेशः तासांलीलाचलितलहरीणां लीलयाचलिताः चंचलाः गच्छंत्योवाचलगतावित्यस्माद्धत्वर्थाक
र्मकेत्यनेनकर्तरिक्तः एतादृश्योयाः लहर्यः तासांव्यतिकरात्संबंधात्त्रिभुवनंजगत्त्रयंपुनीतेपवि–
त्रीकरोति अहह अहहेत्यद्भुतेखेदेइत्यमरः ननुदेवोपिवायुः कथंचौर्यादिगुणयुक्तइत्याकांक्षया
आह सकः यः पवमानः सुमनसांपुष्पाणांस्त्रियः सुमनसः पुष्पमित्यमरः अलभ्यमन्यत्रचौरै

अलभ्यंसौरभ्यंहरतिसततंयःसुमनसांक्षणादेवप्राणानपिविरहशस्त्रक्षतभृताम्

रप्राप्यं अनेनचौर्येवायोः कौशल्यमावेदितं एतादृशंसौरभ्यंसौगंध्यं नियतंयथातथा हरति चोरयति
पुनः सकः यः विरहशस्त्रक्षतभृतां विरहएवरुग्व्याधिवियोगएव शस्त्रंमारकत्वात् यद्वा विरह
श्चशस्त्रंचविरहशस्त्रे ताभ्यांयत्क्षतंतत् बिभ्रतितेविरहशस्त्रक्षतभृतः तेषां क्वचित्तु विरह
शस्त्रक्षतत्वदामितिपाठः तत्रविरहशस्त्राभ्यांक्षतं क्षतयुक्तंकृतं विदारितमितियावत् तादृशं
त्वत्येषामितिसमासः यद्वा विरहशस्त्रयोः क्षतं यस्मिन्नितिव्यधिकरणपदोबहुव्रीहिः तादृशंत्व
त्येषां विरहशस्त्रक्षतयुक्तंत्वत् येषामितिशाकपार्थिवादित्वान्मध्यमपदलोपिसमासोवा तेषां १९
प्राणानपि असूनपि पुंसिभूम्न्यसवः प्राणाइत्यमरः क्षणादेवक्षणमात्रेणेव नियतंयथास्यात्तथा

हरति एतादृशः दुष्टोवायुः श्रेष्ठः त्वल्लहरीसंबंधमाहात्म्येनमहत्कार्यंकरोतीतिभावः। उक्तंचहनुम
न्नाटके येमज्जंतिनिमज्जयंतिचपरांस्तेप्रस्तरादुस्तरेवार्धौवीरतरंतिवानरभटान् संतारयंतेपिच नैते
ग्रावगुणानवारिधिगुणानो वानराणांगुणाः श्रीमद्दाशरथेः प्रतापमहिमासोयंसमुज्जृंभत इतिलोके
पि दुष्टोपिभृत्यस्तत्संबंधमाहात्म्येनमहत्कार्यंकरोतीतिप्रसिद्धमेव ३५ इदानीकेचनलोकाःपरका
र्यसंपादकाः संति केचनपवित्रात्मानः संतः परलोकप्रणयिनोभवंति अहंतुत्वयिस्थापितलोकद्व
यभरः सन् सुखेननिद्रांकरोमीत्याह कियंतइति भोमातः कियंतः कतिसंख्याकाः एकेसाधारणा

त्वदीयानांलीलाचलितलहरीणांव्यतिकरात्पुनीतेसोपिद्रागहहपवमानस्त्रिभुव
नं ३५ कियंतःसंत्येकेनियतमिहलोकार्थघटकाःपरेपूतात्मानःकतिचपरलोक
प्रणयिनः॥

लोकाः इहजगति नियतंलोकार्थघटकाः लोकानांजनानां अर्थाः प्र
योजनानि अर्थोरैविभवाअपीत्यमरः तेषांघटकाः संयोजकाः संति यद्वा इहकियंतः एकेलो
कार्थघटकाः संतः परलोकप्रणयिनः परंलोकंप्रणयंति तेयद्वा परलोकंप्रकर्षेणनयंतिगच्छंति
तेपरलोकप्रणयिनः संतीतियोजना इहलोकेपरकार्यसंपादनजन्यपुण्येनस्वर्गलोकंगच्छंति एवं
च तेषामयंलोकः परलोकश्चसमीचीनइत्याकूतं परेचान्येचकइति यद्वा कतिपरेचपूतात्मानः
संतः पूतः तपः सेवनादिना पवित्रः आत्मायेषांते एतादृशाः संतः नियतंपरलोकप्रणयिनः
संति भ[illegible]वानि करुणा[illegible]र्थाः नवकूपानः पंचम्यंतात्तसिल् दयाहेतोः

शम्भ्वा ... ते शम्भ्वदित्यनेनकदापि अन्यन्नकरोति स्फरख स०
मित्यनेन तत्रैवममस्फरवंनान्यत्रातसूचितं ननुएवंचलोकद्वये तवकागतिरितिन्चेत्तत्राह कथंभू
तोयंत्वयि निहितलोकद्वयभरः त्वयिभवत्यांलोकद्वयेइहलोकेपरलोकेचभरः सर्वेभ्यउत्कृष्टता
निहितः स्थापितः लोकद्वयभरोयेनसः भरः उदरपोषणंवा डुभृञ्धारणपोषणयोरित्यस्माद
चीतिदिक् ३८ इदानींननुरेपापनिवृत्तयेमांस्तौषि तत्रादौपापमेवकिमर्थंकरोषीतिचेत्त्वयास्वप
तिताश्लीलशवशकलसमुदायपरित्राणंयथाक्रियते तथामयाऽपिपापंक्रियते स्वस्वभावस्यसन्
वैरैरपिदुष्परिहारित्वादित्याह भवत्याहीति भोअंब व्रात्याधमपतितया व्रात्याश्चअधमाश्चव्रा-

स्फरवंशेतेमातस्तववरवलुक्रूपातःपुनरयंजगन्नाथःशम्भ्वत्त्वयिनिहितलोकद्वयभरः

३८ त्याधमाः व्रात्याः संस्कारहीनाः अधमानीचाः तेपतिताः यस्यांसातया आहिताग्न्या
दित्वात्पतितशब्दस्यपरनिपातः यद्यपिपतेः सनितनिपति इत्यस्यवेट्कत्वात् निष्ठायां तस्य
विभाषेति इण्निषेधः प्राप्नोतितथापि द्वितीयाश्रितातीतपतितेतिनिपातनाद्भवति एतादृश्याभ-
वत्यात्वयाखंडपरिषत्परित्राणस्नेहः खंडानामर्थात् स्वपतितशवशकलानां भित्तंशकलखंडेवा
पुंस्यर्घोर्धंसमेंशक इत्यमरः परिषत् समुदायः तस्याः परित्राणंपालनं तत्रस्नेहः प्रेम प्रेमानाप्रि
यताहार्दंप्रेमस्नेह इत्यमरः श्लथयितुंत्यक्तुं यथाशक्यः खलुनिश्चयेन एवंदुरितनिवहे दुरितस्य २०
पापस्यनिवहः समूहः तत्रममापिप्रेमा प्रियता अस्तीति शेषः यतोयस्मात् कारणात् जगति

सर्वैरपि अयंस्वभावोनिसर्गः स्वरूपंचस्वभावश्चनिसर्गश्चेत्यमरः दुष्परिहरः दुःखेनापिपरिह
र्तुमशक्यः अस्तीतिशेषः दुःखशब्देउपपदेहरतेः ईषद्दुःस्विनिसूत्रेणखल् यद्वादुरितनिवहेज
गतीतियोजना व्रात्याधमपतितयेत्यनेन तेषामपिरक्षणेकिंवक्तव्यं पुण्यवतामित्यावेदितं खंडमि
त्यनेन अवयवस्य पालनेकिंवक्तव्यं अवयविनः इत्याशयः परिषदित्यनेनैकमपिनत्यज्यत इतिभा
वः दुरितनिवहेत्यनेनबहुषुपातकेषुममेच्छा नत्वेकस्मिन्द्वयोर्वेत्यावेदितं अत्रनिंदयास्तुत्यभिव्य
क्तेर्व्याजस्तुत्यलंकारः तदुक्तं कुवलयानंदे उक्तिर्व्याजस्तुतिर्निंदास्तुतिनिंदयोरिति ममयथाविवेक

भवत्याहिव्रात्याधमपतितपाखंडपरिषत्परित्राणःस्नेहः श्लथयितुमशक्यःखलुय
था॥ ममाप्येवंप्रेमाद्दुरितनिवहेष्वंबजगतिस्वभावोयंसर्वैरपिखलुयतोदुष्परिहरः
२७॥ लेशोपिन तेरामचंद्ररणेरिपून् हतान् स्वनाशकान् शीघ्रंपापिनोनयसेदिवमिति
अत्रारीन् दिवंनयसे इत्युक्त्या भक्तानवश्यंनयसेइतिस्तुत्यभिव्यक्तिः २७ इदानींगंगातांडव
विधिंवर्णयन् स्वतापशमनंप्रार्थयते प्रदोषेति त्रिदशतटिनीतांडवविधिः त्रिदशानां देवानांतटि
नीगंगा तस्याः तांडवं तंडुना तच्छास्त्रप्रवर्त्तकाचार्येणप्रोक्तं ताडवंनाट्यं तेनप्रोक्तमित्यणि
ओर्गुणइतिगुणः तांडवंनटनंनाट्यमित्यमरः तस्याविधिः करणं विधिर्विधानेदैवेचेत्यमरः
तापं अर्थाद्भक्तजनसंतापं यद्वा पूर्वश्लोकान्ममेत्यनुवर्त्तते तथाच ममतापंतिरोधत्तां अंतर्धा
नंगमयतु [illegible] गीमाह कथंभूतस्त्रिदशतटिनीतांडवविधिः प्रदोषांत

नृत्यत्पुरमथ... भैरवल्लहरिभुजसंतानविधुतिः प्रदोषस्यसूर्यास्तानंत
रं षड्घटिकात्मककालस्यांतर्मध्ये नृत्यंकुर्वन् सचासौपुरमथनश्चशिवश्च तेनलीलया उत्प्लु
ताः उत्ऊर्ध्वंधृताः इयंनृत्यचेष्टा एताहृश्यः याः जटाः संयताः केशाः जटास्यात्संयतालका
इतिकोशः तटेआभोगः पतनात्मकः संयोगसंबंधः नृत्यत्पुरमथनलीलोत्धृतजटानांतटाभो
गः तेनभैरवंत्यः गच्छंत्यः चंचलावायालहर्यः वीच्यः ताएवभुजाः संतानंचविधुतिश्चसंतान
विधुती संतानंदीर्घीकरणं विधृतिः कंपः भुजानांसंतानविधुतीयस्मिन् सप्रदोषांतः इदंसम
स्तंव्यस्तंवाउक्तप्रदोषलक्षणे प्रमाणंतु त्रिमुहूर्त्तं प्रदोषःस्यात् भानावस्तंगतेसतीतिहेमाद्या

प्रदोषांतर्नृत्यत्पुरमथनलीलोत्धृतजटातटाभोगभैरवल्लहरिभुजसंतानविधुतिः बि
लक्रोडक्रीडज्जलडमरुटंकारस्फुभगस्तिरोधत्तांपापंत्रिदशतटिनीतांडवविधिः ३८

घ्रदाद्दतंवचनंबोध्यमितिदिक् संतानेत्यत्र संपूर्वक धूञ्कंपने इत्यस्मात्स्त्रियांक्तिन् पुनः क-
थंभूतः त्रिदशतटिनीतांडवविधिः बिलक्रोडक्रीडज्जलडमरुटंकारस्फुभगः बिलस्यविवरस्य-
क्रोडंअर्थात् मध्यः भनाक्रोडंभुजांतरमित्यमरः तत्रक्रीडत् विहरत् यज्जलं तदेवडमरुः वा
द्यविशेषः ढक्केत्यर्थः वाद्यप्रभेदाडमरुमड्डुडिंडिमझर्झराइत्यमरः तस्यतेनवाद्यः टंकारः शब्द
विशेषः तेनस्फुभगः शोभनं स्फुटवाभगंश्रीर्यस्यसः भगंश्रीकाममाहात्म्येत्यमरः सुंदरइत्यर्थः २१
क्वचित्तटक्रोडेतिपाठः ३८ इदानींसर्वदाभवत्यांस्थापितकुशलश्चिनाभरंमां त्वंविषमेअस्मिन्स

मये यदित्यजसितर्हि अतः परंभुवनत्रयेतवविश्वासंकोपिनकुर्यात् तवकरुणाचनिराधारास्यादि
तिगंगायाः भयप्रदर्शनेनाह संदेवेति भोअंब संदेवसर्वदैव त्वयेवभवत्यामेवएवेत्यनेन नीयांत
रंव्यावर्त्तयति अर्पितकुशलचिंताभरं कुशलस्य क्षेमस्य कुशलंक्षेममस्त्रियामित्यमरः तस्यचिंता
कथंममकुशलंभविष्यतीत्या कारिका तस्याभरः आधिक्यं बव्हीचिंतेत्यर्थः भरः समूहोवा
अर्पितः स्थापितः कुशलचिंताभरोयेनसः तंगंगैवममकुशलंकरिष्यतीतिमन्यमानमित्यर्थः
इमंत्वत्समीपेवर्त्तमानमेताहशमां स्फुविषमे स्फुतरामत्यंतं विषमः दुःसहः तस्मिन् अतिकठिन
इत्यर्थः यद्वा विषंगरलंमयते ददातीति विषमः तस्मिन् मेंङ्‌प्रणिदाने इत्यस्यआदेच उपदेशेशि
संदेवत्त्वय्येवार्पितकुशलचिंताभरमिमंयदित्वंमामंबत्यजसिसमयेस्मिन्स्फुविषमे
तदाविश्वासोयंत्रिभुवनतलादस्तसमयेतेनिराधाराचेयंभवतिखलुनिर्व्याजकरुणा
३९ ॥ तीत्यात्वे आतोनुपसर्गेकइति आतोलोप इटिचेत्याकारलोपः एताहशेऽस्मिन्सम
येयदित्यजसितदातर्हिअयंविश्वासः गंगाशरणागतकुशलकर्त्रीत्याकारोनिश्चयः त्रिभुवनतलात्
त्रिभुवनस्यतलंतस्मात् अस्तंतिरोभावं अयतेगच्छतिगमिष्यतीतिवा वर्तमानसामीप्येति भविष्य-
तिलट् चपुनः इयंनिर्व्याजकरुणा अकपटकरुणा निराधाराभवति निर्गतः आधारोयस्याः साए
ताहशीभवति खलुनिश्चयेनसंदेहोनास्तीतिभावः विश्वासाभावेनकस्यापितवनिकटेआगमना
भावात् करुणा[illegible]विश्वासोनास्ति तस्यनिकटेकोपिनागच्छतीतिमसि

ध्यमेव एवञ्च भा ... [torn] ... वारणंकुर्विंतिगंगायाः प्रीतिप्रदर्शनमिति भावः क्वचित्तु स॰
समयेइत्यस्यस्थाने विशयेइतिपाठः तत्रविषयोत्थारणरूपेविषयेइत्यर्थः ३९ इदानींहर वामभागे-
काद्वितीयाकांतावर्त्तते इतिप्रेक्षितुं कपर्दादुल्लस्य सीमंतसरणौ आगता अतएवपार्वत्यासापत्न्यभा
वात्करेणाकर्षितारएतादृशस्तवलहर्योविजयंतामित्याह कपर्दादिति भोजनानि नेतवलहर्यः विजयंतां
सर्वोत्कर्षेणवर्त्तंतां कथंभूताः लहर्यः कपर्दात् शिवजटाजूटात्उल्लस्य प्रसृत्य प्रणयमिलदर्धांगयुव
तेः प्रणयेनप्रीत्यामिलंती संयुज्यमाना अर्धांगेवामभागेयुवतिः पार्वतीयस्यसः तस्य पुरारेः शिवस्य
मृदुलतरसीमंतसरणौ अतिशयेनमृदुलः कोमलः मृदुलतरः तादृशोयः सीमंतः केशवेशः सीमंतः

कपर्दादुल्लस्यप्रणयमिलदर्धांगयुवतेःपुरारेःप्रेंखंत्योमृदुलतरसीमंतसरणौ भवा
न्यासापत्न्यस्फुरितनयनंकोमलरुचाकरेणाक्षिप्तास्तेजननिविजयंतांलहर्यः ४०

केशवेशेइतिशकंध्वादिगणसूत्रेणपररूपं तस्यसरणिः तत्रप्रेंखंत्यः गच्छंत्यः उपरिष्टादधोभागे
आगताइत्यर्थः पुनः कथंभूताः अतएवभवान्यापार्वत्या कर्तृभूतयाकोमलरुचा कोमलारुक् कां-
तिर्यस्यतेन एतेनपार्वतीसौंदर्यमुक्तं अतएवशिवेनप्रीतिवशात् लहरीकर्षणेननिवारिता एतादृशेनक
रेण सापत्न्यस्फुरितनयनंयथास्यात्तथासमानः पतिर्यस्याः सासपत्नी तस्याः भावः सापत्न्यं तेन-
स्फुरितेन कोपेन चंचलेनयनेयस्मिन्कर्मणियथाभवतितथा आक्षिप्ताः आकर्षिताः क्वचित्तुभवान्या २२
इतिषष्ठ्यंतः पाठः तत्रभवान्याःकरेणकर्तृभूतेनेत्यर्थः ४० इदानीं बहवोलोकाः त्वामायाति

तत्रतेषामभीष्टंकरोषीति कारणंवर्त्तते अहंतुस्वभावादेवत्वय्यनुरक्त इतितुभ्यंशपइत्याह प्रपद्यं
तइति भोमातः स्मरधुनि कतिलोकाः अत्रभवतींपूज्यांभवतींत्वांनप्रपद्यंते नायांति अपितु बहवः
प्रपद्यंत इत्यर्थः तत्रायमुपाधिः कारणंस्फुरतिवर्त्ततेकिंतदित्याकांक्षायामाह यत् यस्मात्कारणात्
अभीष्टंवांछितंवितरसि ददासि तेभ्यइतिशेषः ममतुपुनः जगन्नाथ स्यात्मा स्वभावादेवनिस-
र्गादेवत्वयि भवत्याममितं अपरिमितं अनुरागं प्रीतिंविधृतवान् धारयामास इति तुभ्यंभवत्यै-
शपे शपथंकरोमि श्लाघह्नुङ्स्थाशपामिति संप्रदानत्वं ४१ इदानींत्वदीयामृत्तिकामदीयंसम

प्रपद्यंतेलोकाःकतिनभवतीमत्रभवतीमुपाधिस्तत्रायंस्फुरतियदभीष्टंवितरसि
शपेतुभ्यंमातर्ममतुपुनरात्मास्मरधुनिस्वभावादेवत्वय्यमितमनुरागंविधृतवान् ४१
ललाटेयालोकैरिहखलुसलीलंतिलकितातमोहंतुंधत्तेतरुणतरमार्तंडतुलनां ॥

स्त्वंशोकंदूरीकरोत्विति प्रार्थयते ललाटइति पूर्वश्लोकात्संबोधनपदमावर्त्तनीयं भोस्मरधुनित्वदीया
संबंधिनीसास्मृत्स्नाप्रशस्तामृत् मृत्स्नासस्नौप्रशंसायामिति मृच्छब्दात्स्नप्रत्ययः मृन्मृत्तिकाप्र
शस्तातुमृत्सामृत्स्नाचमृत्तिकेत्यमरः ममजगन्नाथकवेः कृत्स्नामपि संपूर्णामपि शुचंशोकंहरतु
ननुमृत्तिकायाःशोकहरणे कथंसामर्थ्यमित्याकांक्षायामाह साका यामृत्साइहलोके ललाटेभाल
देशेसलीलंयथास्यात्तथा तिलकितासती पुंड्रीकृतासती तमोहंतुं तरुणतरमार्तंडतुलनाम् तरुणत
रः मा[illegible] ...संधत्ते बिभर्ति अत्रप्रमाणंतु गंगातीरसमुद्भूतां

मृद्भू... ...शायकेवलमितिब्रह्मांडपुराणवचनंबोध्यम् ति
लककरणप्रकारोप्युक्तस्तत्रैव वामहस्तेजलंकृत्वासावित्र्याचाभिमंत्रितम् तद्विष्णोरितिमंत्रेणमर्द
येन्मृत्तिकांततः अतोदेवेतिसूक्तेनतिलकंकारयेत्सदेति इदंतिलककरणंप्रातःस्नानोत्तरं बोध्यं
पुनःसाका याविधिलिखितदुर्वर्णसरणिं विधिनाब्रह्मणालिखिता: तेचतेदुर्वर्णाः दुष्टाक्षराणि
अयंदरिद्रोभवितामृतभार्यश्चेत्यादयः तेषां सरणिः तांसद्यः लापनाव्यवहितोत्तरकालेएवविलुं
पंतीति विशेषेणलुंपंती प्रोन्छंती एवंचविधिलिखितमपि अलीकंकुर्वत्याममशोकहरणेसामर्थ्यम

विलुंपंतीसद्योविधिलिखितदुर्वर्णसरणिंत्वदीयासामृत्स्नाममहरतुकृत्स्नामपिशुचम्
४२ नरान्मूढांस्तत्तज्जनपदसमासक्तमनसो हसंतःसोल्लासंविकचकुसुमव्रातमि
षतः स्तीतिभावः ४२ इदानींमूढान्नरानुपसंहृतःस्ववासिष्वमराणांमालिन्यदोषंदूरीकुर्वी
याश्चगंगातीरतरवः ममसरवायः संत्वित्याह नरानिति त्रिदशनदिनीतीरतरवः त्रिदशनटिन्याः
गंगायाः तीरं तत्रतस्यवा तरवःवृक्षाः नः अस्माकं भक्तजनानां सरवायः मित्राणिसंतु भवंतु अ
थमित्रंसरवासुहृदित्यमरः कथंभूता: त्रिदशनदिनीतीरतरवः मूढान् मूर्खान् अतएव तत्तज्जनप
समासक्तमनसः तेचतेजनपदाश्चतत्तज्जनपदाःस्वस्वदेशाः नीवृज्जनपदोदेशइत्यमरः तेषुसमास
क्तंसंबद्धम् एतादृशान् नरान् मनुष्यान् विकच कुसुमव्रातमिषतः विकचानिप्रफुल्लानि यानिकुसु २३
मानि पुष्पाणितेषांव्रातः समूहः तस्य तदेववामिषंछलं तस्मात्सोल्लासंसहर्षंयथास्यात्तथाहसंतः

उपहासंकुर्वंतः एतेषांदुष्टस्त्रीयस्त्रीयदेशरनिताभक्त्यात्रैवमरणेनदुर्गतिर्भविष्यति अस्माकंतुसदेवगं
गातीरवासित्वात् उभयगतिर्भविष्यतीतितानुपहसंतीत्युत्प्रेक्षापुनः कथंभूताः नित्यमलिनाः मालि
न्ययुक्ताः तान्जन्मतः श्यामानित्यर्थः एतादृशान् अलिनः भ्रमरान् सौगंध्यैः निजकुसुमसौ
गंध्यैः सततंनिरंतरंयथास्यात्तथापुनानाः पवित्रीकुर्वाणाः एवंचतादृशान् येपुनंतितेस्वसरवं-
मामपिपवित्रंकरिष्यंतीतिभावः सौरभ्यैः नित्यमलिनान् पुनानाइतिवायोजना मधुलिण्मधुपालि
नइत्यमरः ४२ इदानींकेचनस्वेष्टफलावाप्तयेयमनियमादियोगंकुर्वंति अर्हंतुत्वन्नामस्मरणेन

पुनानाःसौरभ्यैःसततमलिनोनित्यमलिनान्सरवायोनःसंतुत्रिदशतटिनीतीरतरवः
४२

प्राप्तकामः सन्जगज्जालंतृणतुल्यंमन्यइत्याह जयंतीति श्रोत्रियपथगे एकेलोकाः
कठिणतरसेवान् अतिशयेनकठिनाकठिनतरासेवायेषांतेतान्एतादृशान् विष्णवादीन् यजंति
पूजयंति तदपरेतेभ्यः देवपूजकेभ्यः परेअन्येपंचमीति योगविभागात्समासः यद्वाते देव
पूजकाः अपरेयेभ्यः ते इतिपंचम्यर्थेबहुव्रीहिः देवपूजकेभ्यउर्वरिताइत्यर्थः वितानव्यास-
क्ताः वितानेषु उल्लोचेषुयज्ञेषुवाव्यासक्ताः विशेषेणआसक्ताः तत्परा इत्यर्थः संतीतिशेषः
अरु... [illegible] ...सिद्धः क्रतुविस्तारयोरस्त्रीवितानंत्रिषुतुच्छकइ

त्ये [illegible] यमनियमयोरक्ताः अनुरक्ताः संतीतिशेषः तान्कुर्वतीत्यर्थः तत्करणकाठिन्यात् कति पयपदोपादानम् यमनियमग्रहणं अष्टानामप्युपलक्षणम् तेचयमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधयः तत्र अहिंसादिपरिग्रहोयमः शौचादिसंपादनंनियमः पद्मकाद्यासनं रेचकादिप्राणायामः इंद्रियाणांस्वस्वविषयेभ्यः प्रत्याहरणंप्रत्याहारः तत्रैवविच्छिद्य अंतरिंद्रियप्रवाहोध्यानंचित्तवृत्तिनिरोधः समाधिरितिदिक् भो-त्रिपथगेजननित्रीन्पथोगच्छन्तीतित्रिपथगायद्वा त्रयाणांपथांसमाहारस्त्रिपथं पथः संख्या-

यजंत्येकेदेवान्कठिनतरसेवांस्तदपरेवितानव्यासक्तायमनियमरक्ताःकतिपये
अहंतुत्वन्नामस्मरणकृतकामस्त्रिपथगेजगज्जालंजानेजननितृणजालेनस-
दृशम् ४४

व्ययादेरितिनपुंसकत्वम् तेनगच्छतीतित्रिपथगा गमेर्डः तत्संबोधनं अहंतुजगन्नाथस्तुत्वन्नामस्मरण कृतकामः सन् तवनाम त्वन्नामप्रत्ययोत्तरपदयोश्चेतित्वादेशः त्वंन्नामस्मरणचिंतनम् तेनकृताः संपादिताः तादृशाः कामाः मनोरथाः येनसः एतादृशः सन्जगज्जालं जगतः जालंसमूहः जगज्जालं जालंसमूह आनायइत्यमरः तृणजालेनकक्षसंधेन सदृशंतुल्यंजानेवेद्मि तृणजालेनेति तुल्यार्थैरित्यादिनातृतीया कलौनामोच्चारणस्यैवसारत्वात्तदेव

करोमीतिभावः तदुक्तं हरेर्नामैवनामैवनामैवममजीवनम् कलौनास्त्येवनास्त्येवनास्त्येवगतिरन्य थेतिदिक् अत्रनामशब्दोनामोच्चारणपरोबोद्धव्यः ४४ इदानींजन्मावधिनिरंतरंपुण्यवतांसा धूनांश्रेयः कर्त्तुंबहवोदेवाः कुशलाः संतिनिराश्रयाणांपापिनांतुत्वांविना अन्यंहितकरं जगतिन पश्यामीत्याह अविश्रांतमितिभोत्रिपथगेजननि अविश्रांतंनिरंतरंजन्मावधिजन्मप्रभृतिजन्मपर्य- न्तंयैस्तैः कृतजन्मार्जनं कृतंतैः कृतेनपुण्येन जन्मार्जनंजन्मसंग्रहस्तत्कुर्वंति तेषांतादृशानांसतांसा धूनांश्रेयः कल्याणंसंपादयितुंकतिविबुधाः कतिसंख्याकादेवाः कृतिनः कुशलानसंति अपि-

अविश्रांतंजन्मावधिसुकृतजन्मार्जनकृतांसतांश्रेयःकर्त्तुंकतिनकृतिनःसंतिविबुधाः
निरस्तालंबानामकृतसुकृतानांतुभवतींविनामुष्मिंल्लोकेनपरमवलोकेहितकरम् ४५

तुबहवः संतीत्यर्थः निरस्तालंबानांनिरस्तः गतः आलंबः आश्रयोयेषांतेषांअकृतसुकृता- नांतुनकृतंसुकृतंपुण्यंयैः तेषांपापिनामित्यर्थः तेषांतुअमुष्मिन्लोकेभवतींविनात्वा मृतेपरं द्वितीयंहितकरंअभिमतसंपादकंनावलोकेनपश्यामि एतत्सर्वंचित्तेनिधायत्वामहंशरणंगतइ तिभावः ४५ इदानींतवजलंपीत्वा मूढमित्रैःसहविहर्त्तुंगतोहंक्वचिदपिसुखंनलब्धवान् अतएव मृदुपवनसंबंधशीतलस्वांकेचिरकालमनिंद्रंमांत्वंस्वापयेतिप्रार्थयते पय इति ...पटाः मूर्खाः ...टाः तैः विशेषश्चइषदपिहिताहित

[torn] ...क्ष्यंतिमच्छंतिव [hole] महान्वराः मित्राणितैः सहसपदिशी टी०
२५ घ्रंसंरंतुविहर्त्तुंयातः गतः गत्यर्थाकर्मकेत्यादिनायाधातोः कर्त्तरिक्तः एताद्दशः अहंक्कचिदपिकस्मिंश्चित्स्थ
लेपिकस्मिंश्चिद्विहारेपिवाविश्रांतिंविश्रामंनअगमंसपदियात इतिवायोजना यद्वातवपयः सपाद-
पीत्वेतिसंबंधः एते[torn]तृष्णावशात्शीघ्रंतवजलपानमात्रंकृतम् नस्नानादिकम् तेनस्वस्मिन्नपराधबाहु
ल्यमस्तीतिसूचितम् भोसदयहृदयेदययासहितंसदयंताद्दशंहृदयंयस्याः सातत्संबोधनम् एताद्दशीभोमा
तः इदानींसंप्रतिएतर्हिसंप्रतीदानीमधुनासांप्रतंतथेत्यमरः मृदुपवनसंचारशिशिरेमृदुःकोमलः अल्प

पयःपीत्वामातस्तवसपदियातःसहृद्भिर्विमूढैःसंरंतुंक्कचिदपिचविश्रांतिमगमम् इ
दानीमुत्संगेमृदुपवनसंचारशिशिरेचिरादुन्निद्रंमांसदयहृदयेशाययचिरम् ४६

इत्यर्थः एतेनवात्यायाः दुःखप्रदत्वानिरासः सूचितः मृदुश्चासौपवनश्चतस्यसंचारः गमनंसंबंधोवा
तेनशिशिरः शीतलः एतेनश्रमसंत्रस्तस्यनिद्रास्थानयोग्यत्वमावेदितम् एताद्दशेउत्संगेअंकेचिरा
त्बहुकालंउन्निद्रंउद्गतानिद्रायस्यसः एताद्दशंमांशाययस्वापयनिद्रांकारयेत्यर्थः शीङ् स्वप्नेइ
तिधातोर्णिजंताल्लोणमध्यमपुरुषैकवचनंसिप् अतोहेः इतिहेर्लुक् निद्रायाः सुखविशेषरूपफल
स्यप्रयोज्यगामित्वात् प्रयोजकरूपकर्तृगामित्वाभावेनाणिचश्चेति आत्मनेपदेलचिराच्छाययेतिवायोज २५
नालोकेपिमातापुत्रंअंकेस्वापयति इतिप्रसिद्धमेवएतदर्थमेव मातरितिसंबोधनम् ४६ ७

इदानीं ममोद्धारायकटिबंधादिकंकुर्वित्याह बधानेति भोसुरधुनि जगन्नाथस्यतन्नाम्नः अयंसमुद्धार
स मयः सम्यगुद्धरणंसमुद्धारः तस्यसमयः कालः अस्तीतिशेषः यद्यपि आत्मनामगुरोर्नामनामातिकृपण-
स्यचश्रेयः कामोनगृण्हीयाज्ज्येष्ठापत्यकलत्रयोरितिनिषेधात् स्वनामग्रहणंश्रेयस्करंनभवतितथापिअत्य-
न्तातुरतयानिषेधाल्लंघनम् अतएवहापितः क्वासिहेसुप्रभुबद्धेवविललापसइतिभट्टीप्रयोगः संगच्छ
तइतिदिक् ननु अस्तुतवोद्धारसमयः मयाकिंकर्त्तव्यमित्यपेक्षायामाह बधानेतित्वंद्राढिमरमणीयंअ
तिशयेनदृढः इतिद्रढिमावर्णदृढादिभ्यः ष्यञ्चेतिचादिमानिच् रऋतोहलादेर्लघोरितिऋकारस्यरका
रः द्रढीमाचासौरमणीयश्चतम् अतिसुंदरंचेत्यर्थः एतादृशंपरिकरंकटिबंधंशीघ्रंबधबंधने भवेत्परिक

बधानद्रागेवद्रढिमरमणीयंपरिकरंकिरीटेबालेंदुंनियमयपुनः पन्नगगणैः

रोग्रातेपर्यंकपरिवारयोः प्रगाढगात्रिकबंधेविवेकासंभयोरपीतिविश्वः ममोद्धारायशीघ्रंकटिबंधंकुर्वितिभा
वः पुनस्त्वंकिरीटेमुकुटे अथमु कुटंकिरीटंपुंनपुंसकमित्यमरः बालेंदुंबालश्चासाविंदुश्चतम् कलात्मकं
चंद्रंपन्न गगणैः पन्नं पतितंगच्छंतितेपन्नागाः सर्पाः तेषांगणाः समूहाः तैः नियमयनियमनंकुरुतत्रै
वस्थापयेत्यर्थः अन्यथाममागमनसमयेपतिष्यतीतिभावः लोकेपिकश्चनमनुष्यः कस्यचिद्व्या-
घ्रादिपीडितस्ययदामोचनंकरोतितदाकटिबंधशिरोभूषणादिकं दृढं करोतीतिप्रसिद्धं यद्वा किरीटे
पन्नग[illegible]तिरजनसाधारणतया इतरः अन्यः नीचोवाइ

तररस... ...जनसाधारणः तुल्यः तस्यभावः साधारणतातया हेलां अर्थात्मम अनादरनकुर्याः माकुर्वित्यर्थः परमत्वद्भक्तेमयि अन्यजनतुल्योयमितिबुद्धिं माकुर्वितिभावः अत्रलोकोक्त्यलंकारः तदुक्तंकुवलयानंदेलोकप्रवादनुकृतिर्लोकोक्तिरितिभण्य तइति ४७ इदानींगंगारूपंस्तौति शरदिति भोस्सुरधुनि येजनाः त्वां ध्यायंतिचिंतयंति तेषांजना नांपरिभवः अनादरः परिभवःपरीभावस्तिरस्क्रियेत्यमरः नउदयति उत्पन्नोनभवतीत्यर्थः यद्यपि अय गतावितिधातुरात्मनेपदम् तथापि इणकिटकटीत्यत्रप्रश्लिष्टस्यईधातोरूलूर्वस्येदंरूपंबोध्यम् अत

नकुर्यास्त्वांहेलामितरजनसाधारणतयाजगन्नाथस्यायंसुरधुनिसमुद्धारसमयः ४७
शरच्चंद्रश्वेतांशशिशकलश्वेतालमुकुटांकरैःकुंभांभोजेवरभयनिरासौचदधतीम्

एवउदयतिचिंततोर्ध्वरश्मिरज्जाविंतिमाघप्रयोगात्संगच्छतइतिदिक् कथंभूतांत्वांशरच्चंद्रश्वेतां- शरदिशरत्काले अथशरत्स्त्रियामित्यमरः तत्रयश्चंद्रः तद्वत् श्वेतांशुभ्रां परमगौरामित्यर्थः शरदित्यनेनपरमनैर्मल्यंसूचित् पुनः कथंभूतां शशिशकलश्वेतालमुकुटाम् अलतिदंशंकुर्वन् गच्छतीत्यलः सर्पः श्वेतश्चासौ अलश्चश्वेतालः शुभ्रसर्पः शशिनश्चंद्रस्यशकलः खंडः शशिश कलःशशिशकलश्चश्वेतालश्चशशिशकलश्वेतालौतौमुकुटेयस्याः सातांयद्वाश्वेताश्चते अलाश्च भूषणानिचश्वेतालाः यद्वाश्वेतस्यरजतस्यअलाः भूषणानिदुर्वर्ण्यंरजतंरूप्यंखर्जूरं श्वेतमित्यपीत्य

भरः गमनभूषणार्थकाद्लधातोः पचाद्यच् शेषासमासाः पूर्ववत् यद्वाशशिशकलश्वेतालः तादृशो
मुकुटोयस्याः सातां यद्वाशशिशकलश्वेतालइवशुभ्रभूषणमिवेति व्याघ्रादित्वादुपमितसमासः श
शिशकलश्वेतालः तादृशोमुकुटोयस्याः सातां यद्वा शशिशकलश्वेत : श्वेतगुणः तंआसमंतात्लातीति
शशिशकलश्वेतालः तादृशोमुकुटोयस्याः सातां यन्मुकुटेचंद्रस्यप्रभाप्रसृताभवतीतिभावः लादानेइ
तिधातोरातश्चोपसर्गेइतिकः गुणेशुक्लादयः पुंसीत्यमरः यद्वा शशिशकलंच श्वेतश्च शशिशकलश्वे
तौ श्वेतोरजतंतौ आसमंताल्लातीतिशशिशकलश्वेतालः तादृशोमुकुटोयस्याः सातां यस्याः रौ
प्यमुकुटेशशिशकलंवर्तत इत्यर्थः अन्यत्विस्तारभयान्नलिख्यते पुनः कथंभूतां करैः चतुर्भि

सुधाधाराकाराभरणवसनांशुभ्रमकरस्थितांत्वांयेध्यायंत्युदयतिननतेषांपरिभवः ४८

र्हस्तैः कुंभांभोजेकुंभश्चअंभोजंचकुंभांभोजेकुंभोघटः अंभोजंकमलंतेवरभयनिरासौच भयस्यनिरासः
नाशः अभयमित्यर्थः वरश्चभयनिरासश्चवरभयनिरासौतौचदधतीबिभ्रतींचतुर्भिर्हस्तैरिमानिच
त्वारिदधतीतिभावः पुनः कथंभूतांत्वांसुधाधाराकाराभरणवसनांसुधायाः अमृतस्यधारा आ
भरणानिचवसनंच आभरणानिभूषणानिवसनंवस्त्रं अलंकारस्त्वाभरणंपरिष्कारोविभूषणम्
वस्त्रमाच्छादनं वासश्चैलंवसनमंशुकमित्यमरः सुधाधारावत् आकारः रूपंयेषांतानि सु
धाधाराकाराणि [illegible] वसनानियस्याः सातां अतिशुभ्राभरणवसनामि

त्येषः ... [illegible] ...णाम् शफरश्चासौ मकरश्चशुफरमकरः मकरोमत्स्यः तत्र स्थितानाम् शफरमत्स्यवाहिनीमित्यर्थः ४८ इदानीं गंगाममशरीरस्फुरत्वंकरोत्वित्याह दरस्मिते तिशंतनोः भीष्मपितुः अंगनाकल्याणानि अंगनानियस्याः सा अंगना अंगात्कल्याणे इतिपामाद्यंतर्गणसूत्रेणअंगशब्दान्नप्रत्ययः श्रीगंगाममजगन्नाथपंडितस्यतनोः शरीरस्यऊडितिह्रस्वश्चेतिवैकल्पिकत्वान्धिसंज्ञायांगुणः शंस्फुरत्वंसपदिशीघ्रंतनोतुविस्तारयतुप्रार्थनायांलोट् कथंभूता अंगना दरस्मितसमुल्लसद्वदनकांतिपूरामृतैः दरईषत्तच्चतत्स्मितंचदरस्मितंतेनसमुल्लसत् विकास

दरस्मितसमुल्लसद्वदनकांतिपूरामृतैर्भवज्वलनभर्जितानन्निशमूर्जयंतीनरान् चिदेकमयचंद्रिकाचयचमत्कृतिंतन्वतीतनोतुममशंतनोःसपदिशंतनोरंगना ४९

मानं तच्चतद्वदनंचतस्यकांतिः छविः तस्याः पूराः आधिक्यानितएवामृतानितैः भवज्वलनभर्जितान् भवएवसंसारएवज्वलनः अग्निः तेनतत्रवाभर्जितादग्धास्तान् एतादृशान् नरान् मनुष्यान् अनिशंसर्वदाऊर्जयंती जीवयंती यद्वाभवस्यमहादेवस्यज्वलनः तृतीयनेत्राग्निः तेनतत्रवाभर्जितान् एवंचतादृशकृत्यंकुर्वंत्याममवपुः स्फुरत्वकरणेनकोप्यायास इतिभावः पुनः कथंभूता अंगना चिदेकमयचंद्रिकाचयचमत्कृतिम् चिदेकमयीचित्स्वरूपासाचासौचंद्रिकाकौमुदीच चंद्रिकाकौमुदीज्योत्स्नाइत्यमरः तस्याःचयः समूहः तस्यचमत्कृतिः चमत्कारः तांतन्वतीमनोतीतितन्वती

विस्तारयती तनोति: शता अनेकचंद्रप्रकाशंस्वयमेवकरोतीतिभाव: अस्मिंच्छ्लोकेपृथ्वीछंद: जसौजसयलावसुग्रहयतिश्चपृथ्वीगुरुरितिलक्षणात् ४९ इदानींसंसारज्वालानिर्दग्धवपु-षोममतापंशमयेत्याह मंत्रैरिति वीचीक्षालितकालियाहितपदे कालियस्याहित: शत्रु: कालियाहित: विष्णु: तस्यपदंचरण: वीच्याक्षालितंप्रक्षालितंवीचीक्षालितंकालियाहितपदं यथासा तत्संबोधनं यद्वा कालिय: अहित: शत्रुर्यस्यस: कालियाहितोविष्णु: शेषंपूर्ववत् यद्वा कालिये आहितं अर्थात् विष्णुनास्थापितं तच्चतत्पदंच शेषंप्राग्वत् हेस्वर्लोककल्लोलि

मंत्रैर्मीलितमौषधैर्मुकुलितंत्रस्तंस्मराणांगणै:स्रस्तंसांद्रसुधारसैर्विदलितं गारुत्मतैर्ग्रावभि: ॥

निस्वर्लोकस्यस्वरलोकस्य कल्लोलिनीनदीतत्संबोधनं त्वं अधुना भवज्वालावलीढात्मन: भवस्यज्वाला: ताभि: अवलीढ: कवलित: व्याप्तइत्यर्थ: तादृश: आत्मायस्य तस्य ममतापंनिरयनिवारयतिरयेतिपाठ: तत्रतिर: कुरुतिर: शब्दाण्णिजंताल्लोट् अव्ययानांभमात्रेटिलोप: इतितिरसष्टेर्लोप: क्वचित्तुभवव्यालावलीढात्मनइतिपाठ: तत्रभवएवव्याल: सर्प: तेनावलीढ: तादृशआत्मायस्यसतस्येतिव्याख्येयं ननुतादृशतापनिवारणेमंत्रादयोबहव: संतीतिचेत्तेधिनशक्ताइत्याह मंत्रैरित्यादि मंत्रैर्मीलितं साहुलेलस्स [illegible] अयंहेतु: सर्वत्र पूर्वार्धेयोज्य: बहुवचनंतुए

को[illegible] यत्र बहुभिः संकुचितं तत्रैकस्यकावार्त्तेत्य
र्थबोधनाय औषधैस्तापानिवारणाययाग्यवैद्यशास्त्रप्रसिद्धैः मुकुलितं मुकुलीभावमापन्नं
स्फुराणांदेवानांगणैः सर्वैः त्रस्तंत्रासंगतंसांद्रस्फुधारसैः सांद्राः निबिडाः तेचतेस्फुधाररसाश्च
तैः अमृतजलैः रसोजलेरसोहर्ष इत्यनेकार्थकोशः स्रस्तं अधः पतितं स्रंस्फु अधःपत
नेपदत्वाभावात् वस्फुस्त्रंस्त्विनिदत्वंन गारुत्मतैः गरुत्मान गरुडः गरुत्मानगरुडस्तार्क्ष्यइ-
त्यमरः देवतायेषांतेगारुत्मताः तैःसास्यदेवतेत्यण् यद्वा गरुत्मतः इमेगारुत्मताः तैः त

वीचीक्षालितकालियाहितपदेस्वर्लोककल्लोलिनित्वंतापंनिरयाधुनाममभवज्वा
लावलीदात्मनः ५०

स्येदमित्यण् एतादृशैः ग्रावभिः पाषाणैः पाषाणप्रस्तरग्रावोपलाश्मा नःशिलादृषदित्य
मरः विदलितं विशेषणदलितंस्फुरितं विशेषश्चखंडखंडभवनं अत्रसर्वत्रपूर्वार्धेनपुंसके
भावेक्तः अतएवकर्त्तुरनभिहितत्वात् मैत्रैरित्यादिषुकर्त्तरितृतीया अत्रश्लोकेशार्दूलविक्री-
डितं म्सौज्सौतौगादित्यऋषयः इतिलक्षणात् ५० इदानींगंगालहरीनटघटीतांडवं
अस्मान्पुनात्वितिप्रार्थयते धूतइति भोस्वर्लोककल्लोलिनि तवभवत्याः व्यालोलोल्लासिवल्ग २८
ल्लहरिनटघटीतांडवं व्यालोलाश्चंचलाउल्लासिन्यः ऊर्ध्वं उच्छलंत्यः वल्गंत्यः गच्छंत्यः एता

दृश्योयाः लहर्यः ताएवनटस्तस्यघटीतांडवं शिरसिघटीं धृत्वानर्तनं यद्वा नटस्यघटीतांड
वं व्यालोलोल्लासिवल्गल्लहरीणांनटघटीतांडवं तत् नः अस्मान् भक्तजनान् पुनातु पवि
त्रीकरोतु व्यालोलादिविशेषणविशिष्टलहरीभवनेमूलमाह कथंभूतायास्तव द्यूतेदूरोदरे
परस्यजिगीषया अक्षैः क्रीडनंद्यूतं तत्र अन्नविजिगीषायाः सत्वात् दिवोविजिगीषाया
मित्यनेननिष्ठातस्यणत्वंन नागेंद्रकृत्तिप्रमथगणमणिश्रेणिनदींदुमुख्यं नागेंद्रोवासुकिः
कृत्तिर्गजादिचर्म प्रमथगणः तन्नामकः पारिषदः मणिश्रेणिः मणीनांरुद्राक्षादिमणीनां

द्यूतेनागेंद्रकृत्तिप्रमथगणमणिश्रेणिनंदींदुमुख्यंसर्वस्वंहारयित्वास्वमथपुर
भिदिद्राकृपणीकर्तुकामे साकूतंहैमवत्यामृदुलहसितयावीक्षितायास्तवांब
व्यालोलोल्लासिवल्गल्लहरिनटघटीतांडवंनःपुनातु ५१

श्रेणिः पंक्तिः नंदिः स्ववाहनभूतो वृषभः इंदुः स्वशिरोभूषणभूतश्चंद्रः एतेषांइतरेतर
योगद्वंद्वः नागेंद्रकृत्तिप्रमथगणमणिश्रेणिनंदींदवः मुख्याः श्रेष्ठाः यस्मिन्तत् एताह
शं सर्वस्वं सर्वंचतत्स्वंचसर्वस्वं धनंहारयित्वाशिवात्सकाशात् पार्वतीगृहीत्वा हार-
यित्वा इत्यत्रणिजंतात् ... प्रयोजककर्तृत्वंपार्वत्याः प्रयोज्यकर्तृत्वंशिवस्य अतएवस
... ...नंग। वीक्षणे कर्तृकत्वाहरणमितिबोधः भक्त

त... भित् पुरनामानंदैत्यंभिनत्ति विदारयतीतित्रिपु
रभित् तस्मिन्नाशिव ...स्मानपणीकर्त्तुकामेसती पणनंव्यवहरणंपणः घञर्थेकविधान
मितिकः अपणः पणः यथासंपद्यते तथाकर्त्तुमितिपणीकर्त्तुकामः इच्छायस्यसः तस्मिन्
लुंपेदवश्यमः कृत्येतुंकाममनसोरपि समोवाहित तयोर्मांसस्यपचियुज्घञोरितिपृषोदरा
दिगणपठितवचनेनकर्त्तुमितिमकारलोपः तादृशेसति मृदुलंहसितंहास्यंयस्याः सातथा
इदानींसपत्नीभूतगंगायाञ्चनेनश्रेष्ठसिद्धिर्भविष्यतीत्याशयेनहासिता एतादृश्याहैमवत्या

विभूषितानंगरिपूत्तमांगासद्यःकृतानेकजनार्तिभंगा मनोहरोत्तुंगचल
त्तरंगागंगाममांगान्यमलीकरोतु ५२ ॥ ॥

हिमवतोहिमाचलस्या पत्यंस्त्रीहैमवती तस्यापत्यमित्यण् टिड्ढाणेतिङीप् तयापार्वत्या
साकूतं आकूतेनअभिप्रायेणसहितंसाकूतं तद्यथास्यात्तथावीक्षितायाः विशेषेणेक्षिता-
वीक्षिता तस्याः विशेषश्चजटाजूटस्थित्याद्रष्टुमशक्यायाअपियत्नतोदर्शनव्यापारत्वंय
द्यपि शिवस्यपूर्वोक्तंसर्वस्वंमयाहृतं अतएवशिवः आत्मानंपणीकरोति तथापिगंगा २९
उर्वरितावर्त्तते साचसपत्नीभूतत्वात्मामंवमत्य एतावत्कालपर्यंतंशिवशिरसिस्थिता-

वर्तते इदानींयाचयित्वांदासीसंपादनीयेति साकूतमित्यस्यार्थ इतिदिक् नर्तनप्रियस्य शिवस्यद्यूतंविस्मारयितुंगंगयानृत्यमारब्धमितिदिक् हैमवतीत्यनेनकठिनहृदयत्वान्ते नसर्वस्वहरणयोग्यत्वं अस्मिन्श्लोकेस्रग्धरावृत्तं स्रग्धराम्रौभ्नौयौयत्रिः सप्तकाइ तिलक्षणात् ५१ इदानींचरमश्लोकेनस्वांगान्यमलीकरणंप्रार्थयते विभूषितेति गंगाभागीरथी गंगाशब्दार्थस्त्क स्मृतंसद्य इत्यष्टमश्लोकेउक्तः ममजगन्नाथस्यांगान्य

इमांपीयूषलहरीं जगन्नाथेननिर्मितां

मलीकरोत्वित्यर्थः कथंभूतागंगा विभूषितानंगरिपूत्तमांगा अनंगस्यकामस्यरिपुर्वै रीशिवः तस्योत्तमांगंमस्तकंविभूषितंस्वस्थित्या शोभायुक्तंकृतं अनंगरिपूत्तमांगं ययासा पुनः कथंभूता सद्यः तत्कालमेवकृतानेकजनार्त्तिभंगा अनेकेचतेजनाश्च तेषामार्त्तिः पीडातस्याः भंगः नाशः कृतः संपादितः अनेकजनार्तिभंगोययासा यद्वा जनानामार्तयः पीडाः अनेकाश्चताः जनार्तयश्चतासांभंगः कृतः अनेक जनार्तिभंगोययासा सद्यः कृतानेकजनार्तिभंगेत्येवंपदंवा पुनः कथंभूता मनोहरोत्तुं गचलत्तरंगा ... त्तरंगाः ... चलंतः चंचलाः तरंगाः

 यस्या ... त इ ... ज्जौग् अनंतरोदीरितलक्ष्म

 भाजौपादौयदीयावुपजातयस्ताइतिलक्षणात् ... स्वकाव्यपठनस्यफलमाहइमा

मिति पीयूषस्यामृतस्यलहरींत्वां यथापीतामृतलहर्याआनंदजनकत्वं तथाअस्या

अपीतिशेषः अन्यकृतिभ्रमवारणायाह जगन्नाथेननिर्मितामिति निर्मितांकृतां शो

षंसुगमंशिवं ५२ यद्यप्यहंमंदमतिस्तथापिटीकासमाप्तिर्हिबभूवशीघ्रं मा

यःपठेत्तस्यसर्वत्रजायंतेसुखसंपदः ॥ ५३ ॥

त्रापरंकारणमस्तिकिंचिच्छ्रीभास्कराज्ञाकिलकिंत्वमोघा १ नृपंद्विपंवातुरगंमृगंवाशु

कंबकंवामहिषंवृषंवाहरीकरोष्यंगनकंहिगंगेस्नानंभवत्यांसकृदीशसंगे २ नारायणो

यस्यपितामहोभून्मणीकभट्टश्चपितातदीयः गोपीयदीयाजननीसुशीलाटीकाकृतानेन-

सदाशिवेन ३ भक्तोपोद्गमहेतोःकेदारत्वंस्थितोसिभूभृतिकिम् तत्राप्यागत्यत्वांस्वशि

वंयाचेविहितत्सर्वं ४ इतिश्रीगंगालहर्य्यांसदाशिवकृतटीकासमाप्तिमगम

त् श्रीगंगार्पणमस्तु श्रीकाशीविश्वेश्वरप्रसन्नोस्तु श्रीकालभैरवप्रसन्नः॥

हें पुस्तक मुकाममुंबई एथें हनुमानगल्लींत नारायणभिकूशेटरवानू यानीं आपल्या स्व
तःच्या शिला छापरवान्यांत छापिलें असे शके १८०४ चैत्रशुद्ध १ सोमवार ता० २०
माहे मार्च सन् १८८२ संवत १९३८ इदंपुस्तकंसमाप्तम् छ छ

इतिसटीकगंगालहरीसमाप्तः

[OrderDescription]
,CREATED=31.07.20 15:39
,TRANSFERRED=2020/07/31 at 15:56:50
,PAGES=61
,TYPE=STD
,NAME=S0003413
,Book Name=M-2449-GANGALAHARI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF

FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF

FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF

FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,